

# ॥ सत्संगदीक्षा मुखपाठ स्पर्धा ॥

आफ्रिका



# Shastriji Shreni

## 315 - Verses
## Sanskrit

BAPS Satsang Pravrutti Central Office Africa


|| Shri Swaminarayano Vijayate ||



Bhagwan Swaminarayan and Aksharbrahman Gunatitanand Swami
(Shri Akshar-Purushottam Maharaj)



Bhramswarup
Bhagatji Maharaj



Bhramswarup
Shastriji Maharaj



Bhramswarup
Yogiji Maharaj



Bhramswarup
Pramukh swami Maharaj



Pragat Bhramaswarup Mahant Swami Maharaj

# I CAN, I WILL, I MUST

# (CWM)

Sadhu Keshavjivandas



Pragat Brahmaswarup Mahant Swami Maharaj

I CAN, I WILL, I MUST

(CWM)

Sadhu Keshavjivandas




## Goal: Memorize 315 Shloks

| Date | Milestone | Mukhpath Shloks | Total Shloks |
|---|---|---|---|
| **28 March 2021, Sunday** | Pragji Bhakta Jayanti | **52** | **52** |
| **25 April 2021, Sunday** | Swaminarayan Jayanti | **36** | **88** |
| **06 June 2021, Sunday** | Yogi Jayanti | **68** | **156** |
| **18 July 2021, Sunday** | Gurupurnima | **64** | **220** |
| **29 August 2021, Sunday** | Janmashtami | **52** | **272** |
| **19 September 2021, Sunday** | Final Round-1 | **43** | **315** |
| **26 September2021, Sunday** | Final Round - 2 | **Revision** | **315** |

[1] સ્વામિનારાયણઃ સાક્ષાદ્ અક્ષરપુરુષોત્તમઃ ।
સર્વેભ્યઃ પરમાં શાન્તિમ્ આનન્દં સુખમર્પયેત્ ॥૧॥

Swãminãrãyanah sãkshãd Akshara-Purushottamah
Sarvebhyah paramam shãntim ãnandam sukham arpayet (1)

[2] દેહોયં સાધનં મુક્તેર્ન ભોગમાત્રસાધનમ્ ।
દુર્લભો નશ્વરશ્ચાયં વારંવારં ન લભ્યતે ॥૨॥

Deho’yam sãdhanam mukter na bhoga-mãtra-sãdhanam
Durlabho nashvarash-chã’yam vãram-vãram na labhyate (2)

[3] લૌકિકો વ્યવહારસ્તુ દેહનિર્વાહહેતુકઃ ।
નૈવ સ પરમં લક્ષ્યમ્ અસ્ય મનુષ્યજન્મનઃ ॥૩॥

Laukiko vyavahãras-tu deha-nirvãha-hetukah
Naiva sa paramam lakshyam asya manushya-janmanaha (3)

[4] નાશાય સર્વદોષાણાં બ્રહ્મસ્થિતેરવાપ્તયે ।
કર્તું ભગવતો ભક્તિમ્ અસ્ય દેહસ્ય લમ્ભનમ્ ॥૪॥

Nãshãya sarva-doshãnãm brahma-sthiter avãptaye
Kartum Bhagavato bhaktim asya dehasya lambhanam (4)

[5] સર્વમિદં હિ સત્સંગાલ્લભ્યતે નિશ્ચિતં જનૈઃ ।
અતઃ સદૈવ સત્સંગઃ કરણીયો મુમુક્ષુભિઃ ॥૫॥

Sarvam idam hi satsangãl-labhyate nishchitam janaihi
Atah sadaiva satsangah karaniyo mumukshubhihi (5)

[6] સત્સંગઃ સ્થાપિતસ્તસ્માદ્ દિવ્યોયં પરબ્રહ્મણા ।
સ્વામિનારાયણેનેહ સાક્ષાદેવાવતીર્ય ચ ॥૬॥

Satsangah sthãpitas-tasmãd divyo'yam parabrahmanã
Swãminãrãyaneneha sãkshãd evã'vatirya cha (6)

[7] સત્સંગસ્યાસ્ય વિજ્ઞાનં મુમુક્ષૂણાં ભવેદિતિ ।
શાસ્ત્રં સત્સંગદીક્ષેતિ શુભાશયાદ્ વિરચ્યતે ॥૭॥

Satsangasyãsya vignãnam mumukshunãm bhaved iti
Shãstram Satsanga-Diksheti shubhã'shayãd virachyate (7)

[8] સત્યસ્ય સ્વાત્મનઃ સંગઃ સત્યસ્ય પરમાત્મનઃ ।
સત્યસ્ય ચ ગુરોઃ સંગઃ સચ્છાસ્ત્રાણાં તથૈવ ચ ॥૮॥

Satyasya svãtmanah sangah satyasya Paramãtmanah
Satyasya cha guroh sangah sach-chhãstrãnãm tathaiva cha (8)

[9] વિજ્ઞાતવ્યમિદં સત્યં સત્સંગસ્ય હિ લક્ષણમ્ ।
કુર્વન્નેવંવિધં દિવ્યં સત્સંગં સ્યાત્ સુખી જનઃ ॥૯॥

Vignãtavyam idam satyam satsangasya hi lakshanam
Kurvan-nevam vidham divyam satsangam syãt sukhi janaha (9)

[10] દીક્ષેતિ દૃઢસંકલ્પઃ સશ્રદ્ધં નિશ્ચયોઽચલઃ ।
સમ્યક્ સમર્પણં પ્રીત્યા નિષ્ઠા વ્રતં દૃઢાશ્રયઃ ॥૧૦॥

Diksheti dradha-sankalpah sa-shraddham nishchayo-chalaha
Samyak samarpanam prityã nishthã vratam dradhãshrayaha (10)

[11] શાસ્ત્રેઽસ્મિંજ્ઞાપિતા સ્પષ્ટમ્ આજ્ઞોપાસનપદ્ધતિઃ ।
પરમાત્મ-પરબ્રહ્મ-સહજાનન્દ-દર્શિતા ॥૧૧॥

Shãstre'smin gnãpitã spashtam ãgnopãsana-paddhatihi
Paramãtma-Parabrahma-Sahajãnanda-darshitã (11)

[12] સત્સંગાધિકૃતઃ સર્વે સર્વે સુખાધિકારિણઃ ।
સર્વેઽર્હા બ્રહ્મવિદ્યાયાં નાર્યશ્ચૈવ નરાસ્તથા ॥૧૨॥

Satsangã'dhikrutah sarve sarve sukhã'dhi-kãrinaha
Sarve'rhã brahmavidyãyãm nãryash-chaiva narãs-tathã (12)

[13] નૈવ ન્યૂનાધિકત્વં સ્યાત્ સત્સંગે લિંગભેદતઃ ।
સ્વસ્વમર્યાદયા સર્વે ભક્ત્યા મુક્તિં સમાપ્નુયુઃ ॥૧૩॥

Naiva nyunãdhikatvam syãt satsange linga-bhedataha
Sva-sva-maryãdayã sarve bhaktyã muktim samãpnuyuhu (13)

[14] સર્વવર્ણગતાઃ સર્વા નાર્યઃ સર્વે નરાસ્તથા ।
સત્સંગે બ્રહ્મવિદ્યાયાં મોક્ષે સદાધિકારિણઃ ॥૧૪॥

Sarva-varna-gatãh sarvã nãryah sarve narãs-tathã
Satsange brahmavidyãyãm mokshe sadã'dhikãrinaha (14)

[15] ન ન્યૂનાધિકતા કાર્યા વર્ણાધારેણ કર્હિચિત્ ।
ત્યક્ત્વા સ્વવર્ણમાનં ચ સેવા કાર્યા મિથઃ સમૈઃ ॥૧૫॥

Na nyunã'dhikatã kãryã varnã'dhãrena karhichit
Tyaktvã sva-varna-mãnam cha sevã kãryã mithah samaihi (15)

[16] જાત્યા નૈવ મહાન્ કોપિ નૈવ ન્યૂનસ્તથા યતઃ ।
જાત્યા ક્લેશો ન કર્તવ્યઃ સુખં સત્સગમાચરેત્ ॥૧૬॥

Jãtyã naiva mahãn ko'pi naiva nyunas-tathã yataha
Jãtyã klesho na kartavyah sukham satsangam ãcharet (16)

[17] સર્વેધિકારિણો મોક્ષે ગૃહિણસ્ત્યાગિનોપિ ચ ।
ન ન્યૂનાધિકતા તત્ર સર્વે ભક્તા યતઃ પ્રભોઃ ॥૧૭॥

Sarve’dhikãrino mokshe gruhinas-tyãgino’pi cha
Na nyunã’dhikatã tatra sarve bhaktã yatah Prabhoho (17)

[18] સ્વામિનારાયણેનન્ય-દૃઢપરમભક્તયે ।
ગૃહીત્વાશ્રયદીક્ષાયા મન્ત્રં સત્સંગમાપ્નુયાત્ ॥૧૮॥

Swãminãrãyane’-nanya-dradha-parama-bhaktaye
Gruhitvã’-shraya-dikshãyã mantram satsangam ãpnuyãt (18)

[19] આશ્રયદીક્ષા મંત્ર આ પ્રમાણે છેઃ
ધન્યોસ્મિ પૂર્ણકામોસ્મિ નિષ્પાપો નિર્ભયઃ સુખી ।
અક્ષરગુરુયોગેન સ્વામિનારાયણાશ્રયાત્ ॥૧૯॥

*The Ashray Diksha Mantra is as follows:*
Dhanyo’-smi purnakãmo’-smi nishpãpo nirbhayah sukhi
Akshara-guru-yogena Swãminãrãyanã-shrayãt (19)

[20] આશ્રયેત્ સહજાનન્દં હરિં બ્રહ્માક્ષરં તથા ।
ગુણાતીતં ગુરું પ્રીત્યા મુમુક્ષુઃ સ્વાત્મમુક્તયે ॥૨૦॥

Ãshrayet Sahajãnandam Harim Brahmã’ksharam tathã
Guṇãtitam gurum prityã mumukshuh svãtma-muktaye (20)

[21] કાષ્ઠજાં દ્વિગુણાં માલાં કન્ઠે સદૈવ ધારયેત્ ।
સત્સંગં હિ સમાશ્રિત્ય સત્સંગનિયમાંસ્તથા ॥૨૧॥

Kãshtha-jãm dvi-gunãm mãlãm kanthe sadaiva dhãrayet
Satsangam hi samãshritya satsanga-niyamãns-tathã (21)

[22] ગુરું બ્રહ્મસ્વરૂપં તુ વિના ન સંભવેદ્ ભવે ।
તત્ત્વતો બ્રહ્મવિદ્યાયાઃ સાક્ષાત્કારો હિ જીવને ॥૨૨॥

Gurum Brahmaswarupam tu vinã na sambhaved bhave
Tattvato brahmavidyãyãh sãkshãtkãro hi jivane (22)

[23] નોત્તમો નિર્વિકલ્પશ્ચ નિશ્ચયઃ પરમાત્મનઃ ।
ન સ્વાત્મબ્રહ્મભાવોપિ બ્રહ્માક્ષરં ગુરું વિના ॥૨૩॥

Nottamo nirvikalpash-cha nishchayah Paramãtmanaha
Na svãtma-brahma-bhãvo'-pi Brahmã'-ksharam gurum vinã (23)

[24] નૈવાપિ તત્ત્વતો ભક્તિઃ પરમાનન્દપ્રાપણમ્ ।
નાપિ ત્રિવિધતાપાનાં નાશો બ્રહ્મગુરું વિના ॥૨૪॥

Naivã-pi tattvato bhaktih paramãnanda-prãpanam
Nã'-pi trividha-tãpãnãm nãsho Brahma-gurum vinã (24)

[25] અતઃ સમાશ્રયેન્નિત્યં પ્રત્યક્ષમક્ષરં ગુરુમ્ ।
સર્વસિદ્ધિકરં દિવ્યં પરમાત્માનુભાવકમ્ ॥૨૫॥

Atah samãshrayen-nityam pratyaksham Aksharam gurum
Sarva-siddhi-karam divyam Paramãtmã’-nubhãvakam (25)

[26] સર્વં દુર્વ્યસનં ત્યાજ્યં સર્વૈઃ સત્સંગિભિઃ સદા ।
અનેકરોગદુઃખાનાં કારણં વ્યસનં યતઃ ॥૨૬॥

Sarvam dur-vyasanam tyãjyam sarvaih satsangibhih sadã
Aneka-roga-dukhãnãm kãranam vyasanam yataha (26)

[27] સુરાભંગાતમાલાદિ યદ્ યદ્ ભવેદ્ધિ માદકમ્ ।
તદ્ ભક્ષયેત્ પિબેન્નૈવ ધૂમ્રપાનમપિ ત્યજેત્ ॥૨૭॥

Surã-bhangã-tamãlãdi yad yad bhaveddhi mãdakam
Tad bhakshayet piben-naiva dhumra-pãnam api tyajet (27)

[28] પરિત્યાજ્યં સદા દ્યૂતં સર્વૈઃ સર્વપ્રકારકમ્ ।
ત્યક્તવ્યો વ્યભિચારશ્ચ નારીભિઃ પુરુષૈસ્તથા ॥૨૮॥

Pari-tyãjyam sadã dyutam sarvaih sarva-prakãrakam
Tyaktavyo vyabhichãrash-cha nãribhih purushais-tathã (28)

[29] માંસં મત્સ્યં તથાણ્ડાનિ ભક્ષયેયુર્ન કર્હિચિત્ ।
પલાણ્ડું લશુનં હિંગુ ન ચ સત્સંગિનો જનાઃ ॥૨૯॥

Mãnsam matsyam tathã'ndãni bhakshayeyur na karhichit
Palãndum lashunam hingu na cha satsangino janãhã (29)

[30] પાતવ્યં ગાલિતં પેયં જલં દુગ્ધાદિકં તથા ।
ખાદ્યં પાનમશુદ્ધં યદ્ ગૃહ્ણીયાદ્ વસ્તુ તન્નહિ ॥૩૦॥

Pãtavyam gãlitam peyam jalam dugdhãdikam tathã
Khãdyam pãnam ashuddham yad grahniyãd vastu tan-nahi (30)

[31] ચૌર્યં ન કર્હિચિત્ કાર્યં સત્સંગમાશ્રિતૈર્જનૈઃ ।
ધર્માર્થમપિ નો કાર્યં ચોરકાર્યં તુ કર્હિચિત્ ॥૩૧॥

Chauryam na karhichit kãryam satsangam ãshritair janaihi
Dharmãrtham api no kãryam chora-kãryam tu karhichit (31)

[32] નૈવાન્યસ્વામિકં ગ્રાહ્યં તદનુજ્ઞાં વિના સ્વયમ્ ।
પુષ્પફલાદ્યપિ વસ્તુ સૂક્ષ્મચૌર્યં તદુચ્યતે ॥૩૨॥

Naivã'nya-svãmikam grãhyam tad-anugnãm vinã svayam
Pushpa-falãdyapi vastu sukshma-chauryam tad uchyate (32)

[33] મનુષ્યાણાં પશૂનાં વા મત્કુણાદેશ્ચ પક્ષિણામ્ ।
કેષાંચિજ્જીવજન્તૂનાં હિંસા કાર્યા ન કર્હિચિત્ ।।૩૩।।

Manushyãnãm pashunãm vã matkunãdesh-cha pakshinãm
Keshãnchij-jiva-jantunãm hinsã kãryã na karhichit (33)

[34] અહિંસા પરમો ધર્મો હિંસા ત્વધર્મરૂપિણી ।
શ્રુતિસ્મૃત્યાદિશાસ્રેષુ સ્ફુટમેવં પ્રકીર્તિતમ્ ।।૩૪।।

Ahinsã paramo dharmo hinsã tvadharma-rupini
Shruti-smrutyãdi-shãstreshu sfutam evam prakirtitam (34)

[35] યાગાર્થમપ્યજાદીનાં નિર્દોષાણાં હિ પ્રાણિનામ્ ।
હિંસનં નૈવ કર્તવ્યં સત્સંગિભિઃ કદાચન ।।૩૫।।

Yãgãrtham apyajãdinãm nirdoshãnãm hi prãninãm
Hinsanam naiva kartavyam satsangibhihi kadãchana (35)

[36] યાગાદિકે ચ કર્તવ્યે સિદ્ધાન્તં સાંપ્રદાયિકમ્ ।
અનુસૃત્ય હિ કર્તવ્યં હિંસારહિતમેવ તત્ ।।૩૬।।

Yãgãdike cha kartavye siddhãntam sãmpradãyikam
Anusrutya hi kartavyam hinsã-rahitam eva tat (36)

[37] મત્વાપિ યજ્ઞશેષં ચ વાપિ દેવનિવેદિતમ્ ।
માંસં કદાપિ ભક્ષ્યં ન સત્સંગમાશ્રિતૈર્જનૈઃ ॥૩૭॥

Matvã'pi yagna-shesham cha vã'pi deva-niveditam
Mãnsam kadãpi bhakshyam na satsangam ãshritair-janaihi (37)

[38] કસ્યાપિ તાડનં નૈવ કરણીયં કદાચન ।
અપશબ્દાપમાનાદિ-સૂક્ષ્મહિંસાપિ નૈવ ચ ॥૩૮॥

Kasyã'pi tãdanam naiva karaniyam kadãchana
Apa-shabdã'pamãnãdi-sukshma-hinsã'pi naiva cha (38)

[39] સત્તા-કીર્તિ-ધન-દ્રવ્ય-સ્ત્રી-પુરુષાદિકાપ્તયે ।
માનેર્ષ્યાક્રોધતશ્ચાપિ હિંસાં નૈવ સમાચરેત્ ॥૩૯॥

Sattã-kirti-dhana-dravya-stri-purushãdikã'ptaye
Mãnershyã-krodhatash-chã'pi hinsãm naiva samãcharet (39)

[40] મનસા વચસા વાપિ કર્મણા હિંસને કૃતે ।
તત્સ્થિતો દુઃખ્યતે નૂનં સ્વામિનારાયણો હરિઃ ॥૪૦॥

Manasã vachasã vã'pi karmanã hinsane krute
Tat-sthito dukhyate nunam Swãminãrãyano Harihi (40)

[41] આત્મઘાતોપિ હિંસૈવ ન કાર્યોઽતઃ કદાચન ।
પતનગલબન્ધાદ્યૈર્વિષભક્ષાદિભિસ્તથા ॥૪૧॥

Ãtma-ghãto’pi hinsaiva na kãryo’tah kadchana
Patana-gala-bandhãdyair visha-bhakshãdibhis-tathã (41)

[42] દુઃખલજ્જાભયક્રોધ-રોગાદ્યાપત્તિકારણાત્ ।
ધર્માર્થમપિ કશ્ચિદ્ધિ હન્યાન્ન સ્વં ન વા પરમ્ ॥૪૨॥

Dukha-lajjã-bhaya-krodha-rogãdyãpatti kãranãt
Dharmã’rtham api kashchiddhi hanyãn-na swam na vã param (42)

[43] તીર્થેઽપિ નૈવ કર્તવ્ય આત્મઘાતો મુમુક્ષુભિઃ ।
નૈવાપિ મોક્ષપુણ્યાપ્તિભાવાત્ કાર્યઃ સ તત્ર ચ ॥૪૩॥

Tirthe’pi naiva kartavya ãtma-ghãto mumukshubhihi
Naivã’pi moksha-punyãpti bhãvãt kãryah sa tatra cha (43)

[44] ભગવાન્ સર્વકર્તાઽસ્તિ દયાલુઃ સર્વરક્ષકઃ ।
સ એવ નાશકઃ સર્વ-સંકટાનાં સદા મમ ॥૪૪॥

Bhagavãn sarva-kartã’sti dayãluh sarva-rakshakaha
Sa eva nãshakah sarva-sankatãnãm sadã mama (44)

[45] ભગવાન્ કુરુતે યદ્ધિ હિતાર્થમેવ તત્સદા ।
પ્રારબ્ધં મે તદિચ્છૈવ સ એવ તારકો મમ ॥૪૫॥

Bhagavãn kurute yaddhi hitãrtham eva tat sadã
Prãrabdham me tad ichchhaiva sa eva tãrako mama (45)

[46] નૂનં નંક્ષ્યન્તિ મે વિઘ્નાઃ પાપદોષાશ્ચ દુર્ગુણાઃ ।
નૂનં પ્રાપ્સ્યામ્યહં શાન્તિમાનન્દં પરમં સુખમ્ ॥૪૬॥

Nunam nankshyanti me vighnãh pãpa-doshãsh-cha dur-gunãhã
Nunam prãpsyãmyaham shãntim ãnandam paramam sukham (46)

[47] યતો માં મિલિતઃ સાક્ષાદ્ અક્ષરપુરુષોત્તમઃ ।
નિશ્ચયેન તરિષ્યામિ દુઃખજાતં હિ તદ્બલાત્ ॥૪૭॥

Yato mãm militah sãkṣhãd Akshara-Puruṣhottamaha
Nishchayena tarishyãmi dukha-jãtam hi tad balãt (47)

[48] વિચાર્યૈવં બલં રક્ષેદ્ નાશ્રિતો નિર્બલો ભવેત્ ।
આનન્દિતો ભવેન્નિત્યં ભગવદ્બલવૈભવાત્ ॥૪૮॥

Vichãryaivam balam rakshed nã'shrito nirbalo bhavet
Ãnandito bhaven-nityam Bhagavad bala vaibhavãt (48)

[49] ષ્ઠીવનં મલમૂત્રાદિવિસર્જનં સ્થલેષુ ચ ।
શાસ્ત્રલોકનિષિદ્ધેષુ ન કર્તવ્યં કદાચન ॥૪૯॥

Shthivanam mala-mutrãdi-visarjanam sthaleshu cha
Shãstra-loka-nishiddheshu na kartavyam kadãchana (49)

[50] શુદ્ધિઃ સર્વવિધા પાલ્યા બાહ્યા ચાભ્યન્તરા સદા ।
શુદ્ધિપ્રિયઃ પ્રસીદેચ્ચ શુદ્ધિમતિ જને હરિઃ ॥૫૦॥

Shuddhih sarvavidhã pãlyã bãhyã chã'bhyantarã sadã
Shuddhi-priyah prasidech-cha shuddhi-mati jane Harihi (50)

[51] સત્સંગિભિઃ પ્રબોદ્ધવ્યં પૂર્વં સૂર્યોદયાત્ સદા ।
તતઃ સ્નાનાદિકં કૃત્વા ધર્તવ્યં શુદ્ધવસ્ત્રકમ્ ॥૫૧॥

Satsangibhih praboddhavyam pūrvam sūryodayāt sadā ।
Tatah snānādikam kṛutvā dhartavyam shuddha vastrakam ॥51॥

[52] પૂર્વસ્યામુત્તરસ્યાં વા દિશિ કૃત્વા મુખં તતઃ ।
શુદ્ધાસનોપવિષ્ટઃ સન્ નિત્યપૂજાં સમાચરેત્ ॥૫૨॥

Purvasyãm uttarasyãm vã dishi krutvã mukham tataha
Shuddhã'sanopavishtah san-nitya-pujãm samãcharet (52)

[53] પ્રભુપૂજોપયુક્તેન ચન્દનેનોર્ધ્વપુણ્ડ્રકમ્ ।
ભાલે હિ તિલકં કુર્યાત્ કુંકુમેન ચ ચન્દ્રકમ્ ।।૫૩।।

Prabhu-pujopa-yuktena chandanenordhva pundrakam
Bhãle hi tilakam kuryãt kumkumena cha chandrakam (53)

[54] ઉરસિ હસ્તયોશ્ચન્દ્રં તિલકં ચન્દનેન ચ ।
સ્વામિનારાયણં મન્ત્રં જપન્ કુર્યાદ્ ગુરું સ્મરન્ ।।૫૪।।

Urasi hastayosh-chandram tilakam chandanena cha
Swãminãrãyanam mantram japan kuryãd gurum smaran (54)

[55] કેવલં ચન્દ્રકઃ સ્ત્રીભિઃ કર્તવ્યસ્તિલકં નહિ ।
કુંકુમદ્રવ્યતો ભાલે સ્મરન્તીભિર્હરિં ગુરુમ્ ।।૫૫।।

Kevalam chandrakah stribhih kartavyas-tilakam na hi
Kumkuma dravyato bhãle smarantibhir harim gurum (55)

[56] તતઃ પૂજાધિકારાય ભક્તઃ સત્સંગમાશ્રિતઃ ।
કુર્યાદાત્મવિચારં ચ પ્રતાપં ચિન્તયન્ હરેઃ ।।૫૬।।

Tatah pujã'dhikãrãya bhaktah satsangam ãshritaha
Kuryãd ãtma-vichãram cha pratãpam chintayan harehe (56)

[57] અક્ષરમહમિત્યેવં ભક્ત્યા પ્રસન્નચેતસા ।
પુરુષોત્તમદાસોસ્મિ મન્ત્રમેતં વદેચ્છુચિમ્ ॥૫૭॥

Aksharam-aham ityevam bhaktyã prasanna chetasã
Purushottama dãso'smi mantram etam vadech-chhuchim (57)

[58] અક્ષરબ્રહ્મરૂપત્વં સ્વસ્યાત્મનિ વિભાવયેત્ ।
કુર્યાચ્ચ માનસી પૂજાં શાન્ત એકાગ્રચેતસા ॥૫૮॥

Aksharabrahma rupatvam svasyã'tmani vibhãvayet
Kuryãch-cha mãnasim pujãm shãnta ekãgra chetasã (58)

[59] હરિર્બ્રહ્મગુરુશ્ચૈવ ભવતો મોક્ષદાયકૌ ।
તયોરેવ હિ કર્તવ્યં ધ્યાનં માનસપૂજનમ્ ॥૫૯॥

Harir Brahma-gurush-chaiva bhavato moksha-dãyakau
Tayor eva hi kartavyam dhyãnam mãnasa-pujanam (59)

[60] સ્થાપયેચ્ચિત્રમૂર્તીશ્ચ શુચિવસ્ત્રોપરિ તતઃ ।
દર્શનં સ્યાદ્ યથા સમ્યક્ તથા હિ ભક્તિભાવતઃ ॥૬૦॥

Sthãpayech-chitra-murtish-cha shuchi vastropari tataha
Darshanam syãd yathã samyak tathã hi bhakti-bhãvataha (60)

[61] મધ્યે તુ સ્થાપયેત્તત્ર હ્યક્ષરપુરુષોત્તમૌ ।
સ્વામિનં હિ ગુણાતીતં મહારાજં ચ તત્પરમ્ ॥૬૧॥

Madhye tu sthãpayet tatra hyakshara-Purushottamau
Swãminam hi Gunãtitam Mahãrãjam cha tat param (61)

[62] પ્રમુખસ્વામિપર્યન્તં પ્રત્યેકગુરુમૂર્તયઃ ।
પ્રસ્થાપ્યાઃ સેવિતાનાં ચ પ્રત્યક્ષં મૂર્તયઃ સ્વયમ્ ॥૬૨॥

Pramukha-Swãmi-paryantam pratyeka-guru-murtayaha
Prasthãpyãh sevitãnãm cha pratyaksham murtayah svayam (62)

[63] આહ્વાનશ્લોકમુચ્ચાર્ય હરિં ચ ગુરુમાહ્વયેત્ ।
હસ્તૌ બદ્ધ્વા નમસ્કારં કુર્યાદ્ધિ દાસભાવતઃ ॥૬૩॥

Ãhvãna-shlokam uchchãrya Harim cha gurum ãhvayet
Hastau baddhvã namaskãram kuryãddhi dãsa-bhãvataha (63)

[64-65] આહ્વાન મંત્ર આ પ્રમાણે છેઃ
ઉત્તિષ્ઠ સહજાનંદ શ્રીહરે પુરુષોત્તમ ।
ગુણાતીતાક્ષર બ્રહ્મન્નુત્તિષ્ઠ કૃપયા ગુરો ॥
આગમ્યતાં હિ પૂજાર્થમ્ આગમ્યતાં મદાત્મતઃ ।
સાન્નિધ્યાદ્ દર્શનાદ્ દિવ્યાત્ સૌભાગ્યં વર્ધતે મમ ॥ (૬૪-૬૫)

*The Ahvan Mantra is as follows:*
Uttishtha Sahajãnanda Shri-Hare Purushottama
Gunãtitãkshara brahmann-uttishtha krupayã guro
Ãgamyatãm hi pujãrtham ãgamyatãm mad-ãtmatah
Sãnnidhyãd darshanãd divyãt saubhãgyam vardhate mama (64-65)

[66] માલામાવર્તયેદ્ મન્ત્રં સ્વામિનારાયણં જપન્ ।
મહિમ્ના દર્શનં કુર્વન્ મૂર્તીનાં સ્થિરચેતસા ॥૬૬॥

Mãlãm ãvartayed mantram Swãminãrãyanam japan
Mahimnã darshanam kurvan murtinãm sthira-chetasã (66)

[67] એકપાદોત્થિતો ભૂત્વા માલામ્ આવર્તયેત્ તતઃ ।
તપસ ઊર્ધ્વહસ્તઃ સન્ કુર્વાણો મૂર્તિદર્શનમ્ ॥૬૭॥

Eka-pãdotthito bhutvã mãlãm ãvartayet tataha
Tapasa urdhva-hastah san kurvãno murti-darshanam (67)

[68] તતઃ સંચિન્તયન્ કુર્યાદ્ અક્ષરપુરુષોત્તમમ્ ।
વ્યાપકં સર્વકેન્દ્રં ચ પ્રતિમાનાં પ્રદક્ષિણાઃ ॥૬૮॥

Tatah sanchintayan kuryãd Akshara-Purushottamam
Vyãpakam sarva kendram cha pratimãnãm pradakshinãhã (68)

[69] સાષ્ટાંગા દણ્ડવત્ કાર્યાઃ પ્રણામાઃ પુરુષૈસ્તતઃ ।
નારીભિસ્તૂપવિશ્યૈવ પંચાંગા દાસભાવતઃ ॥૬૯॥

Sãshãngã dandavat kãryãh pranãmãh purushais-tatah
Nãribhis-tupavishyaiva panchãngã dãsa-bhãvataha (69)

[70] પ્રણામો દણ્ડવચ્ચૈકઃ ક્ષમાયાચનપૂર્વકમ્ ।
ભક્તદ્રોહનિવારાર્થં કાર્યોધિકો હિ પ્રત્યહમ્ ॥૭૦॥

Pranãmo dandavach-chaikah kshamã-yãchana-purvakam
Bhakta-droha-nivãrãrtham kãryo'dhiko hi pratyaham (70)

[71] દિવ્યભાવેન ભક્ત્યા ચ તદનુ પ્રાર્થયેજ્જપન્ ।
સ્વામિનારાયણં મન્ત્રં શુભસંકલ્પપૂર્તયે ॥૭૧॥

Divya-bhãvena bhaktyã cha tad-anu prãrthayej-japan
Swãminãrãyanam mantram shubha-sankalpa-purtaye (71)

[72] ભક્તિતઃ પૂજયિત્વૈવમ્ અક્ષરપુરુષોત્તમમ્ ।
પુનરાગમમન્ત્રેણ પ્રસ્થાપયેન્નિજાત્મનિ ॥૭૨॥

Bhaktitah pujayitvaivam Akshara-Purushottamam
Punar-ãgama-manrena prasthãpayen-nijãtmani (72)

[73] પુનરાગમન મંત્ર આ પ્રમાણે છે:
ભક્ત્યૈવ દિવ્યભાવેન પૂજા તે સમનુષ્ઠિતા ।
ગચ્છાથ ત્વં મદાત્માનમ્ અક્ષરપુરુષોત્તમ ॥૭૩॥

Punrãgaman mantra ã pramãne che:
Bhaktyaiva divya-bhãvena pujã te samanushthitã
Gachchhã'tha tvam mad-ãtmãnam Akshara-Purushottama (73)

[74] તતઃ સત્સંગદાર્ઢ્યાય શાસ્ત્રં પઠ્યં ચ પ્રત્યહમ્ ।
આદેશાશ્ચોપદેશાશ્ચ યત્ર સન્તિ હરેર્ગુરોઃ ॥૭૪॥

Tatah satsanga-dãrdhyãya shãstram pathyam cha pratyaham
Ãdeshãsh-chopadeshãsh-cha yatra santi Harer guroho (74)

[75] તદનુ પ્રણમેદ્ ભક્તાન્ આદરાન્નમ્રભાવતઃ ।
એવં પૂજાં સમાપ્યૈવ કુર્યાત્ સ્વવ્યાવહારિકમ્ ॥૭૫॥

Tad-anu pranamed bhaktãn ãdarãn-namra-bhãvatah
Evam pujãm samãpyaiva kuryãt sva-vyãvahãrikam (75)

[76] ભોજ્યં નૈવ ન પેયં વા વિના પૂજાં જલાદિકમ્ ।
પ્રવાસગમને ચાપિ પૂજાં નૈવ પરિત્યજેત્ ॥૭૬॥

Bhojyam naiva na peyam vã vinã pujãm jalãdikam
Pravãsa-gamane chã'pi pujãm naiva pari-tyajet (76)

[77] વાર્ધક્યેન ચ રોગાદ્યૈરન્યાપદ્ધેતુના તથા ।
પૂજાર્થમ્ અસમર્થશ્ચેત્ તદાન્યૈઃ કારયેત્ સ તામ્ ॥૭૭॥

Vãrdhakyena cha rogãdyair anyã'paddhetunã tathã
Pujãrtham asamarthash-chet tadã'nyaih kãrayet sa tãm (77)

[78] સ્વીયપૂજા સ્વતન્ત્રા તુ સર્વૈ રક્ષ્યા ગૃહે પૃથક્ ।
જન્મનો દિવસાદેવ પૂજા ગ્રાહ્યા સ્વસંતતેઃ ॥૭૮॥

Sviyapujã svatantrã tu sarvai rakshyã gruhe pruthak
Janmano divasãd eva pujã grãhyã sva-santatehe (78)

[79] ભક્તિપ્રાર્થનસત્સંગહેતુના પ્રતિવાસરમ્ ।
સુન્દરં મન્દિરં સ્થાપ્યં સર્વૈઃ સત્સંગિભિર્ગૃહે ॥૭૯॥

Bhakti-prãrthana-satsanga-hetunã prati-vãsaram
Sundaram mandiram sthãpyam sarvaih satsangibhir gruhe (79)

[80] પ્રસ્થાપ્યૌ વિધિવત્ તસ્મિન્નક્ષરપુરુષોત્તમૌ ।
ગુરવશ્ચ ગુણાતીતા ભક્ત્યા પરમ્પરાગતાઃ ॥૮૦॥

Prasthãpyau vidhivat tasminn-Akshara-Purushottamau
Guravash-cha Gunãtitã bhaktyã paramparã-gatãhã (80)

[81] પ્રાતઃ પ્રતિદિનં સાયં સર્વૈઃ સત્સંગિભિર્જનૈઃ ।
આરાર્તિક્યં વિધાતવ્યં સસ્તુતિ ગૃહમન્દિરે ॥૮૧॥

Prãtah prati-dinam sãyam sarvaih satsangibhir janaihi
Ãrãrtikyam vidhãtavyam sa-stuti gruha-mandire (81)

[82] ઉચ્ચૈઃ સ્વરૈર્જય સ્વામિ-નારાયણેતિ ભક્તિતઃ ।
સતાલિવાદનં ગેયં સ્થિરેણ ચેતસા તદા ॥૮૨॥

Uchchaih swarair-jaya Swãmi-nãrãyaneti bhaktitaha
Sa-tãli-vãdanam geyam sthirena chetasã tadã (82)

[83] યૈવ રસવતી પક્વા મન્દિરે તાં નિવેદયેત્ ।
ઉચ્ચાર્ય પ્રાર્થનં ભક્ત્યા તતઃ પ્રસાદિતં જમેત્ ॥૮૩॥

Yaiva rasavati pakvã mandire tãm nivedayet
Uchchãrya prãrthanam bhaktyã tatah prasãditam jamet (83)

[84] હરયેનર્પ્ય ન ગ્રાહ્યમ્ અન્નફલજલાદિકમ્ ।
શુદ્ધૌ શંકિતમન્નાદિ નાદ્યાન્નેશે નિવેદયેત્ ॥૮૪॥

Haraye'narpya na grãhyam anna-fala-jalãdikam
Shuddhau shankitam annãdi nã'dyãnneshe nivedayet (84)

[85] કીર્તનં વા જપં કુર્યાત્ સ્મૃત્યાદિ વા યથારુચિ ।
ગૃહમન્દિરમાસ્થાય ભાવતઃ સ્થિરચેતસા ॥૮૫॥

Kirtanam vã japam kuryãt smrutyãdi vã yathã-ruchi
Gruha-mandiram ãsthãya bhãvatah sthira-chetasã (85)

[86] સંભૂય પ્રત્યહં કાર્યા ગૃહસભા ગૃહસ્થિતૈઃ ।
કર્તવ્યં ભજનં ગોષ્ઠિઃ શાસ્ત્રપાઠાદિ તત્ર ચ ॥૮૬॥

Sambhuya pratyaham kãryã gruha-sabhã gruhasthitaihi
Kartavyam bhajanam goshthih shãstra-pãthãdi tatra cha (86)

[87] શુદ્ધોપાસનભક્તિં હિ પોષયિતું ચ રક્ષિતુમ્ ।
ભક્તિં મન્દિરનિર્માણરૂપાં પ્રાવર્તયદ્ધરિઃ ॥૮૭॥

Shuddhopãsana-bhaktim hi poshayitum cha rakshitum
Bhaktim mandira-nirmãna-rūpãm prãvartayaddharihi (87)

[88] તથૈવાજ્ઞાપયામાસ સેવાર્થં હરિણા સહ ।
તસ્ય ચોત્તમભક્તસ્ય તસ્યૈવૈવાક્ષરસ્ય ચ ॥૮૮॥

Tathaivã'gnãpayãm ãsa sevãrtham Harinã saha
Tasya chottama-bhaktasya tasyevaivã'ksharasya cha (88)

[89] વર્તત ઉત્તમો ભક્તો બ્રહ્મ ભગવતોઽક્ષરમ્ ।
નિત્યં માયાપરં નિત્યં હરિસેવારતં યતઃ ॥૮૯॥

Vartata uttamo bhakto Brahma Bhagavato'ksharam
Nityam mãyã-param nityam Hari-sevãratam yataha (89)

[90-91] મન્દિરાણાં હિ નિર્માણં તદાજ્ઞામનુસૃત્ય ચ ।
દિવ્યાનાં ક્રિયતે ભક્ત્યા સર્વકલ્યાણહેતુના ॥
પુરુષોત્તમમૂર્ત્યા તદ્-મધ્યખણ્ડે યથાવિધિ ।
સહિતં સ્થાપ્યતે મૂર્તિરક્ષરસ્યાપિ બ્રહ્મણઃ ॥ (૯૦-૯૧)

Mandirãnãm hi nirmãnam tad-ãgnãm-anusrutya cha
Divyãnãm kriyate bhaktyã sarva-kalyãna-hetunã
Purushottama-murtyã tad-madhya-khande yathã-vidhi
Sahitam sthãpyate murtir-Aksharasyã'pi Brahmanaha (90-91)

[92] એવમેવ ગૃહાદ્યેષુ કૃતેષુ મન્દિરેષ્વપિ ।
મધ્યે પ્રસ્થાપ્યતે નિત્યં સાક્ષરઃ પુરુષોત્તમઃ ॥૯૨॥

Evam eva gruhãdyeshu kruteshu mandireshvapi
Madhye prasthãpyate nityam sã'ksharah Purushottamaha (92)

[93] પ્રાતઃ સાયં યથાકાલં સર્વસત્સંગિભિર્જનૈઃ ।
નિકટં મન્દિરં ગમ્યં ભક્ત્યા દર્શાય પ્રત્યહમ્ ॥૯૩॥

Prãtah sãyam yathã-kãlam sarva-satsangibhir janaihi
Nikatam mandiram gamyam bhaktyã darshãya pratyaham (93)

[94] યથા સ્વધર્મરક્ષા સ્યાત્ તથૈવ વસ્ત્રધારણમ્ ।
સત્સંગિનરનારીભિઃ કરણીયં હિ સર્વદા ॥૯૪॥

Yathã sva-dharma-rakshã syãt tathaiva vastra-dhãranam
Satsangi-nara-nãribhih karaniyam hi sarvadã (94)

[95] સત્સંગદૃઢતાર્થં હિ સભાર્થમન્તિકે સ્થિતમ્ ।
ગન્તવ્યં પ્રતિસપ્તાહં મન્દિરં વાપિ મણ્ડલમ્ ॥૯૫॥

Satsanga-dradhatãrtham hi sabhãrtham antike sthitam
Gantavyam prati-saptãham mandiram vã'pi mandalam (95)

[96] સ્વામિનારાયણઃ સાક્ષાદક્ષરાધિપતિર્હરિઃ ।
પરમાત્મા પરબ્રહ્મ ભગવાન્ પુરુષોત્તમઃ ॥૯૬॥

Swãminãrãyanah sãkshãd-Aksharãdhipatir-Harihi
Paramãtmã Parabrahma Bhagavãn Purushottamaha (96)

[97] સ એકઃ પરમોપાસ્ય ઈષ્ટદેવો હિ નઃ સદા ।
તસ્યૈવ સર્વદા ભક્તિઃ કર્તવ્યાનન્યભાવતઃ ॥૯૭॥

Sa ekah paramopãsya ishta-devo hi nah sadã
Tasyaiva sarvadã bhaktih kartavyã'nanya-bhãvataha (97)

[98] સાક્ષાદ્ બ્રહ્માક્ષરં સ્વામી ગુણાતીતઃ સનાતનમ્ ।
તસ્ય પરમ્પરાદ્યાપિ બ્રહ્માક્ષરસ્ય રાજતે ॥૯૮॥

Sãkshãd Brahmã'ksharam Swãmi Gunãtitah sanãtanam
Tasya paramparã'dyã'pi Brahmã'ksharasya rãjate (98)

[99] ગુણાતીતસમારબ્ધ-પરમ્પરાપ્રતિષ્ઠિતઃ ।
પ્રકટાક્ષરબ્રહ્મૈકઃ સંપ્રદાયેસ્તિ નો ગુરુઃ ॥૯૯॥

Gunãtita-samãrabdha-paramparã-pratishthitaha
Prakatã'kshara-brahmaikah sampradãye'sti no guruhu (99)

[100] એક એવેષ્ટદેવો નઃ એક એવ ગુરુસ્તથા ।
એકશ્ચૈવાપિ સિદ્ધાન્ત એવં નઃ એકતા સદા ॥૧૦૦॥

Eka eveshta-devo nah eka eva gurus-tathã
Ekash-chaivã'pi siddhãnta evam nah ekatã sadã (100)

[101] સિદ્ધાન્તં સુવિજાનીયાદ્ અક્ષરપુરુષોત્તમમ્ ।
બ્રહ્મવિદ્યાત્મકં દિવ્યં વૈદિકં ચ સનાતનમ્ ॥૧૦૧॥

Siddhãntam suvijãniyãd Akshara-Purushottamam
Brahmavidyãtmakam divyam vaidikam cha sanãtanam (101)

[102] જીવસ્તથેશ્વરશ્ચૈવ માયા બ્રહ્માક્ષરં તથા ।
પરબ્રહ્મેતિ તત્ત્વાનિ ભિન્નાનિ પંચ સર્વદા ॥૧૦૨॥

Jivas-tatheshvarash-chaiva mãyã brahmã'ksharam tathã
Parabrahmeti tattvãni bhinnãni pancha sarvadã (102)

[103] નિત્યાન્યથ ચ સત્યાનિ વિજ્ઞેયાનિ મુમુક્ષુભિઃ ।
સ્વામિનારાયણેનૈવં સિદ્ધાન્તિતં સ્વયં સ્ફુટમ ॥૧૦૩॥

Nityãn yatha cha satyãni vigneyãni mumukshubhihi ।
Svãminãrãyanenaivam siddhãntitam svayam sfutam ॥103॥

[104] તેષુ માયાપરૌ નિત્યમ્ અક્ષરપુરુષોત્તમૌ ।
જીવાનામીશ્વરાણાં ચ મુક્તિસ્તદ્યોગતો ભવેત ॥૧૦૪॥

Teshu mãyã-parau nityam Akshara-Purushottamau
Jivãnãm-ishvarãnãm cha muktis-tad-yogato bhavet (104)

[105] પરમાત્મા પરબ્રહ્મ પરં બ્રહ્માક્ષરાત્ સદા ।
બ્રહ્માપિ સેવતે તં ચ દાસભાવેન સર્વદા ॥૧૦૫॥

Paramãtmã Parabrahma param Brahmã'ksharãt sadã
Brahmã'pi sevate tam cha dãsa-bhãvena sarvadã (105)

[106] સર્વકર્તા ચ સાકારઃ સર્વોપરિ સદા હરિઃ ।
મુમુક્ષુણાં વિમોક્ષાય પ્રકટો વર્તતે સદા ॥૧૦૬॥

Sarva-kartã cha sãkãrah sarvopari sadã Harihi
Mumukshūnãm vimokshãya prakato vartate sadã (106)

[107] બ્રહ્માક્ષરગુરુદ્વારા ભગવાન્ પ્રકટઃ સદા ।
સહિતઃ સકલૈશ્વર્યૈઃ પરમાનન્દમર્પયન્ ॥૧૦૭॥

Brahmã'kshara-guru-dvãrã Bhagavãn prakatah sadã
Sahitah sakalaishvaryaih paramã'nandam arpayan (107)

[108] પ્રીતિઃ કાર્યાત્મબુદ્ધિશ્ચ બ્રહ્માક્ષરે ગુરૌઃ દૃઢા ।
પ્રત્યક્ષભગવદ્ભાવાત્ સેવ્યો ધ્યેયઃ સ ભક્તિતઃ ॥૧૦૮॥

Pritih kãryã'tma-buddhish-cha Bhramã'kshare gurou dradhã
Pratyaksha-Bhagavad-bhãvãt sevyo dhyeyah sa bhaktitaha (108)

[109] સ્વામિનારાયણો મન્ત્રો દિવ્યશ્ચાલૌકિકઃ શુભઃ।
જપ્યોયં સકલૈર્ભક્તૈર્દત્તોયં હરિણા સ્વયમ્॥૧૦૯॥

Swãminãrãyano mantro divyash-chã'laukikah shubhaha
Japyo'yam sakalair bhaktair datto'yam Harinã swayam (109)

[110] અક્ષરં બ્રહ્મ વિજ્ઞેયં મન્ત્રે સ્વામીતિ શબ્દતઃ ।
નારાયણેતિ શબ્દેન તત્પરઃ પુરુષોત્તમઃ ॥૧૧૦॥

Akshara Brahma vigneyam mantre Swãmiti shabdataha
Nãrãyaneti shabdena tat-parah Purushottamaha (110)

[111] સ્વામિનારાયણેનેહ સિદ્ધાન્તોયં પ્રબોધિતઃ ।
ગુરુભિશ્ચ ગુણાતીતૈર્દિગન્તેયં પ્રવર્તિતઃ ॥૧૧૧॥

Swãminãrãyaneneha siddhãnto'yam prabodhitaha
Gurubhish-cha Gunãtitair digante'yam pravartitaha (111)

[112] યજ્ઞપુરુષદાસેન સ્થાપિતો મૂર્તિમત્તયા ।
ગુરુચરિત્રગ્રન્થેષુ પુનરયં દૃઢાયિતઃ ॥૧૧૨॥

Yagnapurushadãsena sthãpito mūrti-mattayã
Guru-charitra-grantheshu punar ayam dradhãyitaha (112)

[113] પ્રમુખગુરુણા યોયં સ્વીયાક્ષરૈઃ સ્થિરીકૃતઃ ।
સાક્ષાદ્ ગુરોઃ પ્રસંગેન લભ્યતેયં હિ જીવને ॥૧૧૩॥

Pramukha-gurunã yo'yam sviyã'ksharaih sthiri-krutaha
Sãkshãd guroh prasangena labhyate'yam hi jivane (113)

[114] અયમેવ સ સિદ્ધાન્તો મુક્તિપ્રદઃ સનાતનઃ ।
ઉચ્યતે દર્શનં દિવ્યમ્ અક્ષરપુરુષોત્તમમ્ ॥૧૧૪॥

Ayam eva sa siddhãnto mukti-pradah sanãtanaha
Uchyate darshanam divyam Akshara-Purushottamam (114)

[115] સદ્ધાન્તં પરમં દિવ્યમ્ એતાદૃશં વિચિન્તયન્ ।
સત્સંગં નિષ્ઠયા કુર્યાદ્ આનન્દોત્સાહપૂર્વકમ્ ॥૧૧૫॥

Siddhãntam paramam divyam etãdrusham vichintayan
Satsangam nishthayã kuryãd ãnandotsãha-purvakam (115)

[116] નિજાત્માનં બ્રહ્મરૂપં દેહત્રયવિલક્ષણમ્ ।
વિભાવ્યોપાસનં કાર્યં સદૈવ પરબ્રહ્મણઃ ॥૧૧૬॥

Nijã'tmãnam brahmarūpam deha-traya-vilakshanam
Vibhãvyopãsanam kãryam sadaiva Parabrahmanaha (116)

[117] અક્ષરાધિપતેર્ભક્તિં સધર્મામાચરેત્ સદા ।
ધર્મેણ રહિતાં નૈવ ભક્તિં કુર્યાત્ કદાચન ॥૧૧૭॥

Aksharãdhipater bhaktim sa-dharmãm ãcharet sadã
Dharmena rahitãm naiva bhaktim kuryãt kadãchana (117)

[118] ભક્તિં વા જ્ઞાનમાલમ્બ્ય નૈવાધર્મં ચરેજ્જનઃ ।
અપિ પર્વવિશેષં વાલમ્બ્ય નાધર્મમાચરેત્ ॥૧૧૮॥

Bhaktim vãgnãnam ãlambya naivã'dharmam charej-janaha
Api parva-vishesham vã' lambya nã'dharmam ãcharet (118)

[119] ભંગાસુરાદિપાનં વા દ્યૂતાદિક્રીડનં તથા ।
ગાલિદાનાદિકં નૈવ પર્વસ્વપિ સમાચરેત્ ॥૧૧૯॥

Bhangã-surãdi-pãnam vã dytãdi-kridanam tathã
Gãli-dãnãdikam naiva parvasvapi samãcharet (119)

[120] પરસ્માદ્ બ્રહ્મણોન્યસ્મિન્નક્ષરાદ્ બ્રહ્મણસ્તથા ।
પ્રીત્યભાવો હિ વૈરાગ્યમ્ અંગં ભક્તેઃ સહાયકમ્ ॥૧૨૦॥

Parasmãd Brahmano'nyasmin-naksharãd Brahmanas-tathã
Prityabhãvo hi vairãgyam angam bhakteh sahãyakam (120)

[121] નિન્દાલજ્જાભયાપદ્ભ્યઃ સત્સંગં ન પરિત્યજેત્ ।
સ્વામિનારાયણં દેવં તદ્ભક્તિં કર્હિચિદ્ ગુરુમ્ ॥૧૨૧॥

Nindã-lajjã-bhayã'padbhyah satsangam na pari-tyajet
Swãminãrãyanam Devam tad-bhaktim karhichid gurum (121)

[122] સેવા હરેશ્ચ ભક્તાનાં કર્તવ્યા શુદ્ધભાવતઃ ।
મહદ્ભાગ્યં મમાસ્તીતિ મત્વા સ્વમોક્ષહેતુના ॥૧૨૨॥

Sevã Haresh-cha bhaktãnãm kartavyã shuddha-bhãvataha
Mahad-bhãgyam mamãstiti matvã sva-moksha-hetunã (122)

[123] નેયો ન વ્યર્થતાં કાલઃ સત્સંગં ભજનં વિના ।
આલસ્યં ચ પ્રમાદાદિ પરિત્યાજ્યં હિ સર્વદા ॥૧૨૩॥

Neyo na vyarthatãm kãlah satsangam bhajanam vinã
Ãlasyam cha pramãdãdi pari-tyãjyam hi sarvadã (123)

[124] કુર્યાદ્ધિ ભજનં કુર્વન્ ક્રિયા આજ્ઞાનુસારતઃ ।
ક્રિયાબન્ધઃ ક્રિયાભારઃ ક્રિયામાનસ્તતો નહિ ॥૧૨૪॥

Kuryãddhi bhajanam kurvan kriyã ãgnã'nusãrataha
Kriyã-bandhah kriyã-bhãrah kriyãmãnas-tato na hi (124)

[125] સેવયા કથયા સ્મૃત્યા ધ્યાનેન પઠનાદિભિઃ ।
સુફલં સમયં કુર્યાદ્ ભગવત્કીર્તનાદિભિઃ ॥૧૨૫॥

Sevayã kathayã smrutyã dhyãnena pathanãdibhihi
Sufalam samayam kuryãd Bhagavat-kirtanãdibhihi (125)

[126] સ્વદુર્ગુણાન્ અપાકર્તું સંપ્રાપ્તું સદ્‌ગુણાંસ્તથા ।
સત્સઙ્ગાશ્રયણં કાર્યં સ્વસ્ય પરમમુક્તયે ॥૧૨૬॥

Sva-dur-gunãn apã-kartum sam-prãptum sad-gunãns-tathã
Satsangã'shrayanam kãryam svasya parama-muktaye (126)

[127] પ્રસન્નતાં સમાવાપ્તું સ્વામિનારાયણપ્રભોઃ ।
ગુણાતીતગુરૂણાં ચ સત્સંગમાશ્રયેત્ સદા ॥૧૨૭॥

Prasannatãm samãvãptum Swãminãrãyana-Prabhoho
Gunãtita-gurunãm cha satsangam ãshrayet sadã (127)

[128] અહો ઈહૈવ નઃ પ્રાપ્તાવક્ષરપુરુષોત્તમૌ ।
તત્પ્રાપ્તિગૌરવાન્નિત્યં સત્સંગાનન્દમાપ્નુયાત્ ॥૧૨૮॥

Aho ihaiva nah prãptãv-Akshara-Puruṣhottamau
Tat-prãpti-gauravãn-nityam satsang-ãnandam ãpnuyãt (128)

[129] સેવાભક્તિકથાધ્યાનતપોયાત્રાદિ સાધનમ્ ।
માનતો દમ્ભતો નૈવ કાર્યં નૈવેર્ષ્યયા તથા ॥૧૨૯॥

Sevã-bhakti-kathã-dhyãna-tapo-yãtrãdi sãdhanam
Mãnato dambhato naiva kãryam naivershyayã tathã (129)

[130] સ્પર્ધયા દ્વેષતો નૈવ ન લૌકિકફલેચ્છયા ।
શ્રદ્ધયા શુદ્ધભાવેન કાર્યં પ્રસન્નતાધિયા ॥૧૩૦॥

Spardhayã dveshato naiva na laukika-falechchhayã
Shraddhayã shuddha-bhãven kãryam prasannatã-dhiyã (130)

[131] દૃશ્યો ન માનુષો ભાવો ભગવતિ તથા ગુરૌ ।
માયાપરૌ યતો દિવ્યાવક્ષરપુરુષોત્તમૌ ॥૧૩૧॥

Drashyo na mãnusho bhãvo Bhagavati tathã gurou
Mãyã-parou yato divyãv-Akshara-Purushottamau (131)

[132] વિશ્વાસઃ સુદૃઢીકાર્યો ભગવતિ તથા ગુરૌ ।
નિર્બલત્વં પરિત્યાજ્યં ધાર્યં ધૈર્યં હરેર્બલમ્ ॥૧૩૨॥

Vishvãsah su-dradhi-kãryo Bhagavati tathã gurau
Nirbalatvam pari-tyãjyam dhãryam dhairyam Harer balam (132)

[133] કાર્યં લીલાચરિત્રાણાં સ્વામિનારાયણપ્રભોઃ ।
શ્રવણં કથનં પાઠો મનનં નિદિધ્યાસનમ્ ॥૧૩૩॥

Kãryam lilã-charitrãnãm Swãminãrãyana-Prabhoho
Shravanam kathanam pãtho mananam nidi-dhyãsanam (133)

[134] પ્રસંગઃ પરયા પ્રીત્યા બ્રહ્માક્ષરગુરોઃ સદા ।
કર્તવ્યો દિવ્યભાવેન પ્રત્યક્ષસ્ય મુમુક્ષુભિઃ ॥૧૩૪॥

Prasangah parayã prityã Brahmã'kshara-guroh sadã
Kartavyo divya-bhãvena pratyakshasya mumukshubhihi (134)

[135] બ્રહ્માક્ષરે ગુરૌ પ્રીતિર્દૃઢૈવાસ્તિ હિ સાધનમ્ ।
બ્રહ્મસ્થિતેઃ પરિપ્રાપ્તેઃ સાક્ષાત્કારસ્ય ચ પ્રભોઃ ॥૧૩૫॥

Brahmã'kshare gurau pritir dradhaivã'sti hi sãdhanam
Brahma-sthiteh pari-prãpteh sãkshãt-kãrasya cha Prabhoho (135)

[136] બ્રહ્મગુણસમાવાપ્ત્યૈ પરબ્રહ્માનુભૂતયે ।
બ્રહ્મગુરોઃ પ્રસંગાનાં કર્તવ્યં મનનં સદા ॥૧૩૬॥

Brahma-guna-samãvãptyai Parabrahmã'nubhūtaye
Brahma-guroh prasangãnãm kartavyam mananam sadã (136)

[137] મનસા કર્મણા વાચા સેવ્યો ગુરુહરિઃ સદા ।
કર્તવ્યા તત્ર પ્રત્યક્ષનારાયણસ્વરૂપધીઃ ॥૧૩૭॥

Manasã karmanã vãchã sevyo Guruharih sadã
Kartavyã tatra pratyaksha-Nãrãyana-svarupa-dhihi (137)

[138] શૃણુયાન્ન વદેન્નાપિ વાર્તાં હીનાં બલેન ચ ।
બલપૂર્ણાં સદા કુર્યાદ્ વાર્તાં સત્સંગમાસ્થિતઃ ॥૧૩૮॥

Shrunuyãn-na vaden-nã'pi vãrtãm hinãm balena cha
Bala-pūrnãm sadã kuryãd vãrtãm satsangam ãsthitaha (138)

[139] વાર્તા કાર્યા મહિમ્નો હિ બ્રહ્મપરમબ્રહ્મણોઃ ।
તત્સમ્બન્ધવતાં ચાપિ સસ્નેહમાદરાત્ સદા ॥૧૩૯॥

Vãrtã kãryã mahimno hi Brahma-Parama-brahmanoho
Tat-sambandha-vatãm chã'pi sa-sneham ãdarãt sadã (139)

[140] સત્સંગિષુ સુહૃદ્ભાવો દિવ્યભાવસ્તથૈવ ચ ।
અક્ષરબ્રહ્મભાવશ્ચ વિધાતવ્યો મુમુક્ષુણા ॥૧૪૦॥

Satsangishu suhrud-bhãvo divya-bhãvas-tathaiva cha
Aksharabrahma-bhãvash-cha vidhãtavyo mumukshunã (140)

[141] પરમાત્મપરબ્રહ્મ-સ્વામિનારાયણપ્રભોઃ ।
બ્રહ્માક્ષરસ્વરૂપસ્ય ગુણાતીતગુરોસ્તથા ॥૧૪૧॥

Paramãtma-Parabrahma-Swãminãrãyana-Prabhoho
Brahmã'kshara-svarūpasya Gunãtīta-guros-tathã (141)

[142] તદર્પિતસ્ય દિવ્યસ્ય સિદ્ધાન્તસ્ય ચ સર્વદા ।
ભક્તાનાં તચ્છ્રિતાનાં ચ પક્ષો ગ્રાહ્યો વિવેકતઃ ॥૧૪૨॥

Tad-arpitasya divyasya siddhãntasya cha sarvadã
Bhaktãnãm tach-chhritãnãm cha paksho grãhyo vivekataha (142)

[143] આજ્ઞાં ભગવતો નિત્યં બ્રહ્મગુરોશ્ચ પાલયેત્ ।
જ્ઞાત્વા તદનુવૃત્તિં ચ તામેવાનુસરેદ્ દૃઢમ્ ॥૧૪૩॥

Ãgnãm Bhagavato nityam Brahma-gurosh-cha pãlayet
Gnãtvã tad-anuvruttim cha tãm evã'nusared dradham (143)

[144] તદાજ્ઞાં પાલયેત્ સદ્ય આલસ્યાદિ વિહાય ચ ।
સાનન્દોત્સાહમાહાત્મ્યં તત્પ્રસાદધિયા સદા ॥૧૪૪॥

Tad-ãgnãm pãlayet sadya ãlasyãdi vihãya cha
Sãnandotsãha-mãhãtmyam tat-prasãda-dhiyã sadã (144)

[145] અન્તર્દૃષ્ટિશ્ચ કર્તવ્યા પ્રત્યહં સ્થિરચેતસા ।
કિં કર્તુમાગતોસ્મીહ કિં કુર્વેહમિહેતિ ચ ॥૧૪૫॥

Antar-drashtish-cha kartavyã pratyaham sthira-chetasã
Kim kartum ãgato'smīha kim kurve'ham iheti cha (145)

[146] સંપ્રાપ્યાક્ષરરૂપત્વં ભજેયં પુરુષોત્તમમ્ ।
પ્રત્યહં ચિન્તયેદેવં સ્વીયલક્ષ્યમતન્દ્રિતઃ ॥૧૪૬॥

Samprãpyã'kshara-rupatvam bhajeyam Purushottamam
Pratyaham chintayed evam sviya-lakshyam atandritaha (146)

[147] કર્તાયં સર્વહર્તાયં સર્વોપરિ નિયામકઃ ।
પ્રત્યક્ષમિહ લબ્ધો મે સ્વામિનારાયણો હરિઃ ॥૧૪૭॥

Kartã'yam sarva-hartã'yam sarvopari niyãmakaha
Pratyaksham iha labdho me Swãminãrãyano Harihi (147)

[148] અત એવાસ્મિ ધન્યોહં પરમભાગ્યવાનહમ્ ।
કૃતાર્થશ્ચૈવ નિઃશઙ્કો નિશ્ચિન્તોસ્મિ સદા સુખી ॥૧૪૮॥

At evã'smi dhanyo'ham parama-bhãgyavãn aham
Krutãrthash-chaiva nihshanko nishchinto'smi sadã sukhi (148)

[149] એવં પ્રાપ્તેર્મહિમ્નશ્ચ પ્રત્યહં પરિચિન્તનમ્ ।
પ્રભોઃ પ્રસન્નતાયાશ્ચ કાર્યં સ્થિરેણ ચેતસા ॥૧૪૯॥

Evam prapter mahimnash-cha pratyaham pari-chintanam
Prabhoh prasannatayash-cha karyam sthirena chetasã (149)

[150] દેહત્રય-ત્ર્યવસ્થાતો જ્ઞાત્વા ભેદં ગુણત્રયાત્ ।
સ્વાત્મનો બ્રહ્મણૈકત્વં પ્રતિદિનં વિભાવયેત્ ॥૧૫૦॥

Deha-traya-tryavasthãto gnãtvã bhedam guna-trayãt
Svãtmano Brahmanaikatvam prati-dinam vibhãvayet (150)

[151] પ્રત્યહમનુસન્ધેયા જગતો નાશશીલતા ।
સ્વાત્મનો નિત્યતા ચિન્ત્યા સચ્ચિદાનન્દરૂપતા ॥૧૫૧॥

Pratyaham anusandheyã jagato nãsha-shilatã
Svãtmano nityatã chintyã sach-chid-ãnanda-rupatã (151)

[152] ભૂતં યચ્ચ ભવદ્યચ્ચ યદેવાગ્રે ભવિષ્યતિ ।
સર્વં તન્મે હિતાયૈવ સ્વામિનારાયણેચ્છયા ॥૧૫૨॥

Bhutam yach-cha bhavad yach-cha yad-eva’gre bhavishyati
Sarvam tan me hitãyaiva Swãminãrãyanechchhayã (152)

[153] પ્રાર્થનં પ્રત્યહં કુર્યાદ્ વિશ્વાસભક્તિભાવતઃ ।
ગુરોર્બ્રહ્મસ્વરૂપસ્ય સ્વામિનારાયણપ્રભોઃ ॥૧૫૩॥

Prãrthanam pratyaham kuryãd vishvãsa-bhakti-bhãvataha
Guror Brahmaswarupasya Swãminãrãyana-Prabhoho (153)

[154] માનેર્ષ્યાકામક્રોધાદિ-દોષાવેગો ભવેત્ તદા ।
અક્ષરમહમિત્યાદિ શાન્તમના વિચિન્તયેત્ ॥૧૫૪॥

Mãnershyã-kãma-krodhãdi-doshã'vego bhavet tadã
Aksharam-aham ityãdi shãnta-manã vichintayet (154)

[155] મયા સહ સદૈવાસ્તિ સર્વદોષનિવારકઃ ।
સ્વામિનારાયણઃ સાક્ષાદ્ એવં બલં ચ ધારયેત્ ॥૧૫૫॥

Mayã saha sadaivã'sti sarva-dosha-nivãrakaha
Swãminãrãyanah sãkshãd evam balam cha dhãrayet (155)

[156] સ્વધર્મં પાલયેન્નિત્યં પરધર્મં પરિત્યજેત્ ।
સ્વધર્મો ભગવદ્ગુર્વોરાજ્ઞાયાઃ પરિપાલનમ્ ॥૧૫૬॥

Sva-dharmam pãlayen-nityam para-dharmam pari-tyajet
Sva-dharmo Bhagavad-gurvor ãgnãyãh pari-pãlanam (156)

[157] તદાજ્ઞાં યત્ પરિત્યજ્ય ક્રિયતે સ્વમનોધૃતમ્ ।
પરધર્મઃ સ વિજ્ઞેયો વિવેકિભિર્મુમુક્ષુભિઃ ॥૧૫૭॥

Tad-ãgnãm yat pari-tyajya kriyate sva-mano-dhrutam
Para-dharmah sa vigneyo vivekibhir mumukshubhihi (157)

[158] સત્સંગનિયમાદ્ યદ્ધિ વિરુદ્ધં ધર્મલોપકમ્ ।
ફલદમપિ નાચર્યં ભવેદ્ યદ્ ભક્તિબાધકમ્ ॥૧૫૮॥

Satsanga-niyamãd yaddhi viruddham dharma-lopakam
Fala-dam api nã'charyam bhaved yad bhakti-bãdhakam (158)

[159] આદરેણ પ્રણામૈશ્ચ મધુરવચનાદિભિઃ ।
યથોચિતં હિ સમ્માન્યા વૃદ્ધા જ્ઞાનવયોગુણૈઃ ॥૧૫૯॥

Ãdarena pranãmaish-cha madhura-vachanãdibhihi
Yatho-chitam hi sanmãnyã vruddhã gnãna-vayo-gunaihi (159)

[160] સદૈવાદરણીયા હિ વિદ્વદ્વરિષ્ઠશિક્ષકાઃ ।
યથાશક્તિ ચ સત્કાર્યાઃ સાધુવાદાદિકર્મણા ॥૧૬૦॥

Sadaivã'daraniyã hi vidvad-varishtha-shikshakãhã
Yathã-shakti cha sat-kãryãh sãdhu-vãdãdi-karmanã (160)

[161] જનસંબોધનં કુર્યાદ્ યથાકાર્યગુણાદિકમ્।
સંવર્ધયેત્ તદુત્સાહં યથાશક્તિ સુકર્મસુ॥૧૬૧॥

Jana-sambodhanam kuryãd yathã-kãrya-gunãdikam
Samvardhayet tad-utsãham yathã-shakti su-karmasu (161)

[162] સત્યાં વદેદ્ હિતાં ચૈવ વદેદ્ વાણીં પ્રિયાં તથા ।
મિથ્યારોપ્યોપવાદો ન કસ્મિંશ્ચિત્ કર્હિચિજ્જને ॥૧૬૨॥

Satyãm vaded hitãm chaiva vaded vãnim priyãm tathã
Mithyã'ropyo'pavãdo na kasminsh-chit karhichij-jane (162)

[163] ન વદેત્ કુત્સિતાં વાચમ્ અપશબ્દકલંકિતામ્ ।
શ્રોતૃદુ:ખકરીં નિન્દ્યાં કઠોરાં દ્વેષગર્ભિણીમ્ ॥૧૬૩॥

Na vadet kutsitãm vãcham apa-shabda-kalankitãm
Shrotru-dukha-karim nindyãm kathorãm dvesha-garbhinim (163)

[164] અસત્યં ન વદેત્ ક્વાપિ વદેત્ સત્યં હિતાવહમ્ ।
સત્યમપિ વદેન્નૈવ યત્ સ્યાદન્યાહિતાવહમ્ ॥૧૬૪॥

Asatyam na vadet kvãpi vadet satyam hitã'vaham
Satyam api vaden-naiva yat syãd anyã'hitã'vaham (164)

[165] અન્યાવગુણદોષાદિવાર્તાં કદાપિ નોચ્ચરેત્ ।
તથાકૃતે ત્વશાન્તિઃ સ્યાદ્ અપ્રીતિશ્ચ હરેર્ગુરોઃ ॥૧૬૫॥

Anyã'vaguna-doshãdi-vãrtãm kadã'pi nochcharet
Tathã krute tvashãntih syãd apritish-cha Harer guroho (165)

[166] અત્યન્તાવશ્યકે નૂનં પરિશુદ્ધેન ભાવતઃ ।
સત્યપ્રોક્તૌ ન દોષઃ સ્યાદ્ અધિકારવતાં પુરઃ ॥૧૬૬॥

Atyantã'vashyake nunam pari-shuddhena bhãvataha
Satya-proktau na doshah syãd adhikãra-vatãm puraha (166)

[167] આચારો વા વિચારો વા તાદૃક્ કાર્યો ન કર્હિચિત્ ।
અન્યેષામ્ અહિતં દુઃખં યેન સ્યાત્ ક્લેશવર્ધનમ્ ॥૧૬૭॥

Ãchãro vã vichãro vã tãdruk kãryo na karhichit
Anyeshãm ahitam dukham yena syãt klesha-vardhanam (167)

[168] સુહૃદ્ભાવેન ભક્તાનાં શુભગુણગણાન્ સ્મરેત્ ।
ન ગ્રાહ્યોવગુણસ્તેષાં દ્રોહઃ કાર્યો ન સર્વથા॥૧૬૮॥

Suhrad-bhãvena bhaktãnãm shubha-guna-ganãn smaret
Na grãhyo'vagunas-teshãm drohah kãryo na sarvathã (168)

[169] સુખે નોચ્છૃંખલો ભૂયાદ્ દુઃખે નોદ્વેગમાપ્નુયાત્ ।
સ્વામિનારાયણેચ્છાતઃ સર્વં પ્રવર્તતે યતઃ ॥૧૬૯॥

Sukhe noch-chhrunkhalo bhuyãd dukhe nodvegam ãpnuyãt
Swãminãrãyanechchhãtah sarvam pravartate yataha (169)

[170] વિવાદઃ કલહો વાપિ નૈવ કાર્યઃ કદાચન ।
વર્તિતવ્યં વિવેકેન રક્ષ્યા શાન્તિશ્ચ સર્વદા ॥૧૭૦॥

Vivãdah kalaho vã'pi naiva kãryah kadãchana
Vartitavyam vivekena rakshyã shãntish-cha sarvadã (170)

[171] વચને વર્તને ક્વાપિ વિચારે લેખને તથા ।
કઠોરતાં ભજેન્નૈવ જનઃ કોપિ કદાચન ॥૧૭૧॥

Vachane vartane kvãpi vichãre lekhane tathã
Kathoratãm bhajen-naiva janah ko'pi kadãchana (171)

[172] સેવાં માતુઃ પિતુઃ કુર્યાદ્ ગૃહી સત્સંગમાશ્રિતઃ ।
પ્રતિદિનં નમસ્કારં તત્પાદેષુ નિવેદયેત્ ॥૧૭૨॥

Sevãm mãtuh pituh kuryãd gruhi satsangam ãshritaha
Prati-dinam namaskãram tat-pãdeshu nivedayet (172)

[173] શ્વશુરઃ પિતૃવત્ સેવ્યો વધ્વા શ્વશ્રૂશ્ચ માતૃવત્ ।
સ્વપુત્રીવત્ સ્નુષા પાલ્યા શ્વશ્વ્રાપિ શ્વશુરેણ ચ ॥૧૭૩॥

Shvashurah pitruvat sevyo vadhvã shvashrush-cha mãtruvat
Sva-putrivat snushã pãlyã shvashrvã'pi shvashurena cha (173)

[174] સંપાલ્યાઃ પુત્રપુત્ર્યશ્ચ સત્સંગશિક્ષણાદિના ।
અન્યે સમ્બન્ધિનઃ સેવ્યા યથાશક્તિ ચ ભાવતઃ ॥૧૭૪॥

Sampãlyãh putra-putryash-cha satsanga-shikshanãdinã
Anye sambandhinah sevyã yathã-shakti cha bhãvataha (174)

[175] ગૃહે હિ મધુરાં વાણીં વદેદ્ વાચં ત્યજેત્ કટુમ્ ।
કમપિ પીડિતં નૈવ પ્રકુર્યાદ્ મલિનાશયાત્ ॥૧૭૫॥

Gruhe hi madhurãm vãnim vaded vãcham tyajet katum
Kam api piditam naiva prakuryãd malinã'shayãt (175)

[176] મિલિત્વા ભોજનં કાર્યં ગૃહસ્થૈઃ સ્વગૃહે મુદા ।
અતિથિર્હિ યથાશક્તિ સંભાવ્ય આગતો ગૃહમ્ ॥૧૭૬॥

Militvã bhojanam kãryam gruhasthaih sva-gṛuhe mudã
Atithir hi yathã-shakti sambhãvya ãgato gruham (176)

[177] મરણાદિપ્રસંગેષુ કથાભજનકીર્તનમ્ ।
કાર્યં વિશેષતઃ સ્માર્યો હ્યક્ષરપુરુષોત્તમઃ ॥૧૭૭॥

Maranãdi-prasangeshu kathã-bhajana-kirtanam
Kãryam visheshatah smãryo hyakshara-Purushottamah (177)

[178] પુત્રીપુત્રાત્મિકા સ્વસ્ય સંસ્કાર્યા સંતતિઃ સદા ।
સત્સંગદિવ્યસિદ્ધાન્તૈઃ સદાચારૈશ્ચ સદ્‌ગુણૈઃ ॥૧૭૮॥

Putri-putrãtmikã svasya sanskãryã santatih sadã
Satsanga-divya-siddhãntaih sad-ãchãraish-cha sadgunaihi (178)

[179] સત્સંગશાસ્ત્રપાઠાદ્યૈર્ગર્ભસ્થામેવ સંતતિમ્ ।
સંસ્કુર્યાત્ પૂરયેન્ નિષ્ઠામ્ અક્ષરપુરુષોત્તમે ॥૧૭૯॥

Satsanga-shãstra-pãthãdyair-garbha-sthãm eva santatim
Sanskuryãt purayen-nishthãm Akshara-Purushottame (179)

[180] કુદૃષ્ટ્યા પુરુષૈર્નૈવ સ્ત્રિયો દૃશ્યાઃ કદાચન ।
એવમેવ કુદૃષ્ટ્યા ચ સ્ત્રીભિર્દૃશ્યા ન પૂરુષાઃ ॥૧૮૦॥

Kudrashtyã purushair naiva striyo drushyãh kadãchana
Evam eva kudrushtyã cha stribhir drushyã na purushãhã (180)

[181] સ્વીયપત્નીતરાભિસ્તુ રહસિ વસનં સહ ।
આપત્કાલં વિના ક્વાપિ ન કુર્યુર્ગૃહિણો નરાઃ ॥૧૮૧॥

Sviya-patnitarãbhis-tu rahasi vasanam saha
Ãpat-kãlam vinã kvãpi na kuryur gruhino narãhã (181)

[182] તથૈવ નહિ નાર્યોપિ તિષ્ઠેયુઃ સ્વપતીતરૈઃ ।
પુરુષૈઃ સાકમેકાન્તે હ્યાપત્તિસમયં વિના ॥૧૮૨॥

Tathaiva na hi nãryo'pi tishtheyuh sva-patitaraihi
Purushaih sãkam-ekãnte hyãpatti-samayam vinã (182)

[183] નરઃ સમીપસમ્બન્ધ-હીનાં સ્ત્રિયં સ્પૃશેન્નહિ ।
નૈવ સ્પૃશેત્ તથા નારી તાદૃશં પુરુષાન્તરમ્ ॥૧૮૩॥

Narah samipa-sambandha-hinãm striyam sprushen-na hi
Naiva sprushet tathã nãri tãdrusham purushãntaram (183)

[184] આપત્કાલેન્યરક્ષાર્થં સ્પર્શે દોષો ન વિદ્યતે ।
અન્યથા નિયમાઃ પાલ્યા અનાપત્તૌ તુ સર્વદા ॥૧૮૪॥

Ãpat-kãle'nya-rakshãrtham sparshe dosho na vidyate
Anyathã niyamãh pãlyã anãpattau tu sarvadã (184)

[185] અશ્લીલં યત્ર દૃશ્યં સ્યાદ્ ધર્મસંસ્કારનાશકમ્ ।
નાટકચલચિત્રાદિ તન્ન પશ્યેત્ કદાચન ॥૧૮૫॥

Ashlilam yatra drushyam syãd dharma-sanskãra-nãshakam
Nãtaka-chala-chitrãdi tan-na pashyet kadãchana (185)

[186] મનુષ્યો વ્યસની યઃ સ્યાદ્ નિર્લજ્જો વ્યભિચારવાન્ ।
તસ્ય સંગો ન કર્તવ્યઃ સત્સંગમાશ્રિતૈર્જનૈઃ ॥૧૮૬॥

Manushyo vyasani yah syãd nirlajjo vyabhichãravãn
Tasya sango na kartavyah satsangam-ãshritair-janaihi (186)

[187] સંગશ્ચારિત્ર્યહીનાયાઃ કરણીયો નહિ સ્ત્રિયાઃ ।
સ્ત્રીભિઃ સ્વધર્મરક્ષાર્થં પાલ્યાશ્ચ નિયમા દૃઢમ્ ॥૧૮૭॥

Sangash-chãritrya-hinãyãh karaniyo na hi striyãhã
Stribhihi sva-dharma-rakshãrtham pãlyãsh-cha niyamã dradham (187)

[188] ન તાદૃક્છૃણુયાદ્ વાચં ગીતં ગ્રન્થં પઠેન્ન ચ ।
પશ્યેન્ન તાદૃશં દૃશ્યં યસ્માત્ કામવિવર્ધનમ્ ॥૧૮૮॥

Na tãdruk-chhrunuyãd vãcham gītam grantham pathenna cha
Pashyen-na tãdrusham drashyam yasmãt kãma-vivardhanam (188)

[189] ધનદ્રવ્યધરાદીનાં સદા દાનપ્રદાનયોઃ ।
નિયમા લેખસાક્ષ્યાદેઃ પાલનીયા અવશ્યતઃ ॥૧૮૯॥

Dhana-dravya-dharãdinãm sadã'dãna-pradãnayoho
Niyamã lekha-sãkshyãdeh pãlaniyã avashyataha (189)

[190] પ્રસંગે વ્યવહારસ્ય સમ્બન્ધિભિરપિ સ્વકૈઃ ।
લેખાદિનિયમાઃ પાલ્યાઃ સકલૈરાશ્રિતૈર્જનૈઃ ॥૧૯૦॥

Prasange vyavahãrasya sambandhibhir api svakaihi
Lekhãdi-niyamãh pãlyãh sakalair ãshritair janaihi (190)

[191] ન કાર્યો વ્યવહારશ્ચ દુષ્ટૈર્જનૈઃ સહ ક્વચિત્ ।
દીનજનેષુ ભાવ્યં ચ સત્સંગિભિર્દયાન્વિતૈઃ ॥૧૯૧॥

Na kãryo vyavahãrash-cha dushtair janaih saha kvachit
Dina-janeshu bhãvyam cha satsangibhir dayã'nvitaihi (191)

[192] લૌકિકં ત્વવિચાર્યૈવ સહસા કર્મ નાચરેત્ ।
ફલાદિકં વિચાર્યૈવ વિવેકેન તદ્ આચરેત્ ॥૧૯૨॥

Laukikam tvavichãryaiva sahasã karma nã'charet
Falãdikam vichãryaiva vivekena tad ãcharet (192)

[193] લુંચા કદાપિ ન ગ્રાહ્યા કૈશ્ચિદપિ જનૈરિહ ।
નૈવ કાર્યો વ્યયો વ્યર્થઃ કાર્યઃ સ્વાયાનુસારતઃ ॥૧૯૩॥

Lunchã kadãpi na grãhyã kaishchid api janair iha
Naiva kãryo vyayo vyarthah kãryah svã'yã'nusãrataha (193)

[194] કર્તવ્યં લેખનં સમ્યક્ સ્વસ્યાયસ્ય વ્યયસ્ય ચ ।
નિયમાનનુસૃત્યૈવ પ્રશાસનકૃતાન્ સદા ॥૧૯૪॥

Kartavyam lekhanam samyak svasyã'yasya vyayasya cha
Niyamãn anusrutyaiva prashãsana-krutãn sadã (194)

[195] સ્વાયાદ્ધિ દશમો ભાગો વિંશોઽથવા સ્વશક્તિતઃ ।
અર્પ્યઃ સેવાપ્રસાદાર્થં સ્વામિનારાયણપ્રભોઃ ॥૧૯૫॥

Svã'yãddhi dashamo bhãgo vinsho'thavã sva-shaktitaha
Arpyah sevã-prasãdãrtham Swãminãrãyana-Prabhoho (195)

[196] સ્વોપયોગાનુસારેણ પ્રકુર્યાત્ સંગ્રહં ગૃહી ।
અન્નદ્રવ્યધનાદીનાં કાલશક્ત્યનુસારતઃ ॥૧૯૬॥

Svopayogã'nusãrena prakuryãt sangraham gruhi
Anna-dravya-dhanãdinãm kãla-shaktyanusãrataha (196)

[197] અન્નફલાદિભિશ્ચૈવ યથાશક્તિ જલાદિભિઃ ।
પાલિતાઃ પશુપક્ષ્યાદ્યાઃ સંભાવ્યા હિ યથોચિતમ્ ॥૧૯૭॥

Anna-falãdibhish-chaiva yathã-shakti jalãdibhihi
Pãlitãh pashu-pakshyãdyãh sambhãvyã hi yathochitam (197)

[198] ધનદ્રવ્યધરાદીનાં પ્રદાનાદાનયોઃ પુનઃ ।
વિશ્વાસહનનં નૈવ કાર્યં ન કપટં તથા ॥૧૯૮॥

Dhana-dravya-dharãdinãm pradãnã'dãnayoh punaha
Vishvãsa-hananam naiva kãryam na kapatam tathã (198)

[199] પ્રદાતું કર્મકારિભ્યઃ પ્રતિજ્ઞાતં ધનાદિકમ્ ।
યથાવાચં પ્રદેયં તત્ નોનં દેયં કદાચન ॥૧૯૯॥

Pradãtum karma-kãribhyah pratignãtam dhanãdikam
Yathã-vãcham pradeyam tat nonam deyam kadãchana (199)

[200] નૈવ વિશ્વાસઘાતં હિ કુર્યાત્ સત્સંગમાશ્રિતઃ ।
પાલયેદ્ વચનં દત્તં પ્રતિજ્ઞાતં ન લંઘયેત્ ॥૨૦૦॥

Naiva vishvãsa-ghãtam hi kuryãt satsangam ãshritaha
Pãlayed vachanam dattam pratignãtam na langhayet (200)

[201] પ્રશાસ્તા પાલયેદ્ ધર્માન્ નિયતા યે સુશાસને ।
લોકાનાં ભરણં પુષ્ટિં કુર્યાત્ સંસ્કારરક્ષણમ્ ॥૨૦૧॥

Prashãstã pãlayed dharmãn-niyatã ye sushãsane
Lokãnãm bharanam pushtim kuryãt sanskãra-rakshanam (201)

[202] સ્વાસ્થ્યશિક્ષણસંરક્ષા-વિદ્યુદન્નજલાદિકૈઃ ।
સુવ્યવસ્થા વિધાતવ્યા સર્વાભ્યુદયહેતુના ॥૨૦૨॥

Svãsthya-shikshana-samrakshã-vidyud-anna-jalãdikaihi
Su-vyavasthã vidhãtavyã sarvã'bhyudaya-hetunã (202)

[203] ગુણસામર્થ્યરુચ્યાદિ વિદિત્વૈવ જનસ્ય તુ ।
તદુચિતેષુ કાર્યેષુ યોજનીયો વિચાર્ય સઃ ॥૨૦૩॥

Guna-sãmarthya-ruchyãdi viditvaiva janasya tu
Yad-uchiteshu kãryeshu yojaniyo vichãrya saha (203)

[204] શક્યા ભગવતો યત્ર ભક્તિઃ સ્વધર્મપાલનમ્ ।
તસ્મિન્ દેશે નિવાસો હિ કરણીયઃ સુખેન ચ ॥૨૦૪॥

Shakyã Bhagavato yatra bhaktih sva-dharma-pãlanam
Tasmin deshe nivãso hi karaniyah sukhena cha (204)

[205] વિદ્યાધનાદિકં પ્રાપ્તું દેશાન્તરં ગતેપિ ચ ।
સત્સંગમાદરાત્ તત્ર કુર્યાન્નિયમપાલનમ્ ॥૨૦૫॥

Vidyã-dhanãdikam prãptum deshãntaram gate'pi cha
Satsangam ãdarãt tatra kuryãn-niyama-pãlanam (205)

[206] યદ્દેશે હિ સ્વવાસઃ સ્યાત્ તદ્દેશનિયમાશ્ચ યે ।
સર્વથા પાલનીયાસ્તે તત્પ્રશાસનસંમતાઃ ॥૨૦૬॥

Yad-deshe hi sva-vãsah syãt tad-desha-niyamãsh-cha ye
Sarvathã pãlaniyãste tat-prashãsana-sammatãhã (206)

[207] સંજાતે દેશકાલાદેર્વૈપરીત્યે તુ ધૈર્યતઃ ।
અન્તર્ભજેત સાનન્દમ્ અક્ષરપુરુષોત્તમમ્ ॥૨૦૭॥

Sanjãte desha-kãlãder vaiparitye tu dhairyataha
Antar-bhajet sãnandam Akshara-Purushottamam (207)

[208] આપત્કાલે તુ સમ્પ્રાપ્તે સ્વીયવાસસ્થલે તદા ।
તં દેશં હિ પરિત્યજ્ય સ્થેયં દેશાન્તરે સુખમ્ ॥૨૦૮॥

Ãpat-kãle tu samprãpte sviya-vãsa-sthale tadã
Tam desham hi pari-tyajya stheyam deshãntare sukham (208)

[209] કાર્યં બાલૈશ્ચ બાલાભિર્બાલ્યાદ્ વિદ્યાભિપ્રાપણમ્ ।
દુરાચારઃ કુસંગશ્ચ ત્યાજ્યાનિ વ્યસનાનિ ચ ॥૨૦૯॥

Kãryam bãlaish-cha bãlãbhir bãlyãd vidyã'bhi-prãpanam
Durãchãrah kusangash-cha tyãjyãni vyasanãni cha (209)

[210] ઉત્સાહાદ્ આદરાત્ કુર્યાત્ સ્વાભ્યાસં સ્થિરચેતસા ।
વ્યર્થતાં ન નયેત્કાલં વિદ્યાર્થી વ્યર્થકર્મસુ ॥૨૧૦॥

Utsãhãd ãdarãt kuryãt svã'bhyãsam sthira-chetasã
Vyarthatãm na nayet kãlam vidyãrthī vyartha-karmasu (210)

[211] બાલ્યાદેવ દૃઢીકુર્યાત્ સેવાવિનમ્રતાદિકમ્ ।
નિર્બલતાં ભયં ચાપિ નૈવ ગચ્છેત્ કદાચન ॥૨૧૧॥

Bãlyãd eva dradhi-kuryãt sevã-vinamratãdikam
Nirbalatãm bhayam chã'pi naiva gachchhet kadãchana (211)

[212] બાલ્યાદેવ હિ સત્સંગં કુર્યાદ્ ભક્તિં ચ પ્રાર્થનામ્ ।
કાર્યા પ્રતિદિનં પૂજા પિત્રોઃ પંચાંગવન્દના ॥૨૧૨॥

Bãlyãd eva hi satsangam kuryãd bhaktim cha prãrthanãm
Kãryã prati-dinam pujã pitroh panchãnga-vandanã (212)

[213] વિશેષસંયમઃ પાલ્યઃ કૌમાર્યે યૌવને તથા ।
અયોગ્યસ્પર્શદૃશ્યાદ્યાસ્ત્યાજ્યાઃ શક્તિવિનાશકાઃ ॥૨૧૩॥

Vishesha-sanyamah pãlyah kaumãrye yauvane tathã
Ayogya-sparsha-drushyãdyãs-tyãjyãh shakti-vinãshakãhã (213)

[214] સત્ફલોન્નાયકં કુર્યાદ્ ઉચિતમેવ સાહસમ્ ।
ન કુર્યાત્ કેવલં યદ્ધિ સ્વમનોલોકરંજકમ્ ॥૨૧૪॥

Sat-falonnãyakam kuryãd uchitam eva sãhasam
Na kuryãt kevalam yaddhi sva-mano-loka-ranjakam (214)

[215] નિયતોદ્યમકર્તવ્યે નાલસ્યમ્ આપ્નુયાત્ ક્વચિત્ ।
શ્રદ્ધાં પ્રીતિં હરૌ કુર્યાત્ પૂજાં સત્સંગમન્વહમ્ ॥૨૧૫॥

Niyatodyama-kartavye nã'lasyam ãpnuyãt kvachit
Shraddhãm pritim Harau kuryãt pujãm satsangam anvaham (215)

[216] સંગોત્ર બલવાઁલ્લોકે યથાસંગં હિ જીવનમ્ ।
સતાં સંગમ્ અતઃ કુર્યાત્ કુસંગં સર્વથા ત્યજેત ॥૨૧૬॥

Sango'tra balavãnl-loke yathã-sangam hi jivanam
Satãm sangam atah kuryãt kusangam sarvathã tyajet (216)

[217] કામાસક્તો ભવેદ્ યો હિ કૃતઘ્નો લોકવંચકઃ ।
પાખણ્ડી કપટી યશ્ચ તસ્ય સંગં પરિત્યજેત્ ॥૨૧૭॥

Kãmã'sakto bhaved yo hi krutaghno loka-vanchakaha
Pãkhandi kapati yash-cha tasya sangam pari-tyajet (217)

[218] હરેસ્તદવતારાણાં ખણ્ડનં વિદધાતિ યઃ ।
ઉપાસ્તેઃ ખણ્ડનં યશ્ચ કુરુતે પરમાત્મનઃ ॥૨૧૮॥

Hares-tad-avatãrãnãm khandanam vidadhãti yaha
Upãsteh khandanam yash-cha kurute Paramãtmanaha (218)

[219] સાકૃતિકં પરબ્રહ્મ મનુતે યો નિરાકૃતિ ।
તસ્ય સંગો ન કર્તવ્યસ્તાદૃગ્ગ્રન્થાન્ પઠેન્નહિ ॥૨૧૯॥

Sãkrutikam Parabrahma manute yo nirãkruti
Tasya sango na kartavyas-tãdrug-granthãn pathen-na hi (219)

[220] ખણ્ડનં મન્દિરાણાં યો મૂર્તીનાં કુરુતે હરેઃ ।
સત્યાહિંસાદિધર્માણાં તસ્ય સંગં પરિત્યજેત્ ॥૨૨૦॥

Khandanam mandirãnãm yo murtinãm kurute Harehe
Satyã'hinsãdi-dharmãnãm tasya sangam pari-tyajet (220)

[221] ગુર્વાશ્રયવિરોધી યો વૈદિકશાસ્ત્રખન્ડકઃ ।
ભક્તિમાર્ગવિરોધી સ્યાત્ તસ્ય સંગં ન ચાચરેત્ ॥૨૨૧॥

Gurvãshraya-virodhi yo vaidika-shãstra-khandakaha
Bhakti-mãrga-virodhi syãt tasya sangam na chã'charet (221)

[222] બુદ્ધિમાનપિ લોકે સ્યાદ્ વ્યાવહારિકકર્મસુ ।
ન સેવ્યો ભક્તિહીનશ્ચેચ્છાસ્ત્રપારંગતોપિ વા ॥૨૨૨॥

Buddhimãn api loke syãd vyãvahãrika-karmasu
Na sevyo bhakti-hinash-chech-chhãstra-pãrangato'pi vã (222)

[223] શ્રદ્ધામેવ તિરસ્કૃત્ય હ્યાધ્યાત્મિકેષુ કેવલમ્ ।
પુરસ્કરોતિ યસ્તર્કં તત્સંગમાચરેન્નહિ ॥૨૨૩॥

Shraddhãm eva tiras krutya hyãdhyãtmikeshu kevalam
Puras-karoti yas-tarkam tat-sangam-ãcharen-na hi (223)

[224] સત્સંગેપિ કુસંગો યો જ્ઞેયઃ સોપિ મુમુક્ષુભિઃ ।
તત્સંગશ્ચ ન કર્તવ્યો હરિભક્તૈઃ કદાચન ॥૨૨૪॥

Satsange'pi kusango yo gneyah so'pi mumukshubhihi
Tat-sangash-cha na kartavyo haribhaktaih kadãchana (224)

[225] હરૌ ગુરૌ ચ પ્રત્યક્ષે મનુષ્યભાવદર્શનઃ ।
શિથિલો નિયમે યશ્ચ ન તસ્ય સંગમાચરેત્ ॥૨૨૫॥

Harau gurau cha pratyakshe manushya-bhãva-darshanaha
Shithilo niyame yash-cha na tasya sangam ãcharet (225)

[226] ભક્તેષુ દોષદૃષ્ટિઃ સ્યાદ્ અવગુણૈકભાષકઃ ।
મનસ્વી યો ગુરુદ્રોહી ન ચ તત્સંગમાચરેત્ ॥૨૨૬॥

Bhakteshu dosha-drushtih syãd avagunaika-bhãshakaha
Manasvi yo guru-drohi na cha tat-sangam ãcharet (226)

[227] સત્કાર્યનિન્દકો યશ્ચ સચ્છાસ્ત્રનિન્દકો જનઃ ।
સત્સંગનિન્દકો યશ્ચ તત્સંગમાચરેન્નહિ ॥૨૨૭॥

Sat-kãrya-nindako yash-cha sach-chhãstra-nindako janaha
Satsanga-nindako yash-cha tat-sangam ãcharen-na hi (227)

[228] વચનાનાં શ્રુતેર્યસ્ય નિષ્ઠાયા ભંજનં ભવેત્ ।
ગુરૌ હરૌ ચ સત્સંગે તસ્ય સંગં પરિત્યજેત્ ॥૨૨૮॥

Vachanãnãm shruter yasya nishthãyã bhanjanam bhavet
Gurau Harau cha satsange tasya sangam pari-tyajet (228)

[229] ભવેદ્ યો દૃઢનિષ્ઠાવાન્ અક્ષરપુરુષોત્તમે ।
દૃઢભક્તિર્વિવેકી ચ કુર્યાત્ તત્સંગમાદરાત્ ॥૨૨૯॥

Bhaved yo dradha-nishthãvãn Akshara-Purushottame
Dradha-bhaktir-vivekī cha kuryãt tat-sangam ãdarãt (229)

[230] હરેર્ગુરોશ્ચ વાક્યેષુ શંકા યસ્ય ન વિદ્યતે ।
વિશ્વાસુર્બુદ્ધિમાન્ યશ્ચ કુર્યાત્ તત્સંગમાદરાત્ ॥૨૩૦॥

Harer-gurosh-cha vãkyeshu shankã yasya na vidyate
Vishvãsur buddhimãn yash-cha kuryãt tat-sangam ãdarãt (230)

[231] આજ્ઞાયાઃ પાલને નિત્યં સોત્સાહં તત્પરો દૃઢઃ ।
નિર્માનઃ સરલો યશ્ચ કુર્યાત્ તત્સંગમાદરાત્ ॥૨૩૧॥

Ãgnãyãh pãlane nityam sotsãham tat-paro dradhaha
Nirmãnaha saralo yash-cha kuryãt tat-sangam ãdarãt (231)

[232] હરેર્ગુરોશ્ચરિત્રેષુ દિવ્યેષુ માનુષેષુ યઃ ।
સસ્નેહં દિવ્યતાદર્શી કુર્યાત્ તત્સંગમાદરાત્ ॥૨૩૨॥

Harer gurosh-charitreshu divyeshu mãnusheshu yah
Sa-sneham divyatã-darshi kuryãt tat-sangam ãdarãt (232)

[233] તત્પરોન્યગુણગ્રાહે વિમુખો દુર્ગુણોક્તિતઃ ।
સુહૃદ્ભાવી ચ સત્સંગે કુર્યાત્ તત્સંગમાદરાત્ ॥૨૩૩॥

Tat-paro'nya-guna-grãhe vimukho dur-gunoktitaha
Suhrad-bhãvī cha satsange kuryãt tat-sangam ãdarãt (233)

[234] લક્ષ્યં યસ્યૈકમાત્રં સ્યાદ્ ગુરુહરિપ્રસન્નતા ।
આચારેપિ વિચારેપિ કુર્યાત્ તત્સંગમાદરાત્ ॥૨૩૪॥

Lakshyam yasyaika-mãtram syãd Guruhari-prasannatã
Ãchãre'pi vichãre'pi kuryãt tat-sangam ãdarãt (234)

[235] સ્વસંપ્રદાયગ્રન્થાનાં યથાશક્તિ યથારુચિ ।
સંસ્કૃતે પ્રાકૃતે વાપિ કુર્યાત્ પઠનપાઠને ॥૨૩૫॥

Sva-sampradãya-granthãnãm yathã-shakti yathã-ruchi
Sanskrute prãkrute vã'pi kuryãt pathana-pãthane (235)

[236] સ્વામિવાર્તાઃ પઠેન્નિત્યં તથૈવ વચનામૃતમ્ ।
ગુણાતીતગુરૂણાં ચ ચરિતં ભાવતઃ પઠેત્ ॥૨૩૬॥

Swãmi-vãrtãhã pathen-nityam tathaiva Vachanãmrutam
Gunãtita-gurunãm cha charitam bhãvatah pathet (236)

[237] ઉપદેશાશ્ચરિત્રાણિ સ્વામિનારાયણપ્રભોઃ ।
ગુણાતીતગુરૂણાં ચ સત્સંગિનાં હિ જીવનમ્ ॥૨૩૭॥

Upadeshãsh-charitrãni Swãminãrãyana-Prabhoho
Gunãtita-gurunãm cha satsanginãm hi jivanam (237)

[238] અતસ્તચ્છ્રવણં કુર્યાદ્ મનનં નિદિધ્યાસનમ્ ।
મહિમ્ના શ્રદ્ધયા ભક્ત્યા પ્રત્યહં શાન્તચેતસા ॥૨૩૮॥

Atas-tach-chhravanam kuryãd mananam nidi-dhyãsanam
Mahimnã shraddhayã bhaktyã pratyaham shãnta-chetasã (238)

[239] સાંપ્રદાયિકસિદ્ધાન્ત-બાધકરં હિ યદ્ વચઃ ।
પઠ્યં શ્રવ્યં ન મન્તવ્યં સંશયોત્પાદકં ચ યત્ ॥૨૩૯॥

Sãmpradãyika-siddhãnta-bãdhakaram hi yad vachaha
Pathyam shravyam na mantavyam sanshayotpãdakam cha yat (239)

[240] સ્વામિનારાયણે ભક્તિં પરાં દૃઢયિતું હૃદિ ।
ગુરુહરેઃ સમાદેશાચ્ચાતુર્માસ્યે વ્રતં ચરેત્ ॥૨૪૦॥

Swãminãrãyane bhaktim parãm dradhayitum hradi
Guruhareh samãdeshãch chãturmãsye vratam charet (240)

[241] ચાન્દ્રાયણોપવાસાદિર્મન્ત્રજપઃ પ્રદક્ષિણાઃ ।
કથાશ્રુતિર્દણ્ડવચ્ચ પ્રણામા અધિકાસ્તદા ॥૨૪૧॥

Chãndrãyanopavãsãdir mantra-japah pradakshinãhã
Kathã-shrutir-dandavach-cha pranãmã adhikãs-tadã (241)

[242] ઇત્યેવમાદિરૂપેણ શ્રદ્ધયા પ્રીતિપૂર્વકમ્ ।
હરિપ્રસન્નતાં પ્રાપ્તું વિશેષાં ભક્તિમાચરેત્ ।।૨૪૨।।

Ityevam ãdirupena shraddhayã priti-purvakam
Hari-prasannatãm prãptum visheshãm bhaktim ãcharet (242)

[243] સમ્પ્રદાયસ્ય શાસ્ત્રાણાં પઠનં પાઠનં તદા ।
યથારુચિ યથાશક્તિ કુર્યાદ્ નિયમપૂર્વકમ્ ।।૨૪૩।।

Sampradãyasya shãstrãnãm pathanam pãthanam tadã
Yathã-ruchi yathã-shakti kuryãd niyama-purvakam (243)

[244] સર્વૈઃ સત્સંગિભિઃ કાર્યાઃ પ્રીતિં વર્ધયિતું હરૌ ।
ઉત્સવા ભક્તિભાવેન હર્ષેણોલ્લાસતસ્તથા ।।૨૪૪।।

Sarvaih satsangibhih kãryãh pritim vardhayitum Harau
Utsavã bhakti-bhãvena harshenollãsatas-tathã (244)

[245] જન્મમહોત્સવા નિત્યં સ્વામિનારાયણપ્રભોઃ ।
બ્રહ્માક્ષરગુરૂણાં ચ કર્તવ્યા ભક્તિભાવતઃ ।।૨૪૫।।

Janma-mahotsavã nityam Swãminãrãyana-Prabhoho
Brahmã'kshara-gurunãm cha kartavyã bhakti-bhãvataha (245)

[246] હરેર્ગુરોર્વિશિષ્ટાનાં પ્રસંગાનાં દિનેષુ ચ ।
સત્સંગિભિર્યથાશક્તિ કાર્યાઃ પર્વોત્સવા જનૈઃ ॥૨૪૬॥

Harer guror vishishtãnãm prasangãnãm dineshu cha
Satsangibhir yathã-shakti kãryãh parvotsavã janaihi (246)

[247] સવાદ્યં કીર્તનં કાર્યં પર્વોત્સવેષુ ભક્તિતઃ ।
મહિમ્નશ્ચ કથાવાર્તા કરણીયા વિશેષતઃ ॥૨૪૭॥

Sa-vãdyam kirtanam kãryam parvotsaveshu bhaktitaha
Mahimnash-cha kathã-vãrtã karaniyã visheshataha (247)

[248] ચૈત્રશુક્લનવમ્યાં હિ કાર્યં શ્રીરામપૂજનમ્ ।
કૃષ્ણાષ્ટમ્યાં તુ કર્તવ્યં શ્રાવણે કૃષ્ણપૂજનમ્ ॥૨૪૮॥

Chaitra-shukla-navamyãm hi kãryam Shri-Rãma-pujanam
Krishnã'shtamyãm tu kartavyam Shrãvane Krishna-pujanam (248)

[249] શિવરાત્રૌ હિ કર્તવ્યં પૂજનં શંકરસ્ય ચ ।
ગણેશં ભાદ્રશુક્લાયાં ચતુર્થ્યાં પૂજયેત્ તથા ॥૨૪૯॥

Shiva-rãtrau hi kartavyam pujanam Shankarasya cha
Ganesham Bhãdra-shuklãyãm chaturthyãm pujayet tathã (249)

[250] મારુતિમ્ આશ્વિને કૃષ્ણ-ચતુર્દશ્યાં હિ પૂજયેત્ ।
માર્ગે મન્દિરસંપ્રાપ્તૌ તદ્દેવં પ્રણમેદ્ હૃદા ॥૨૫૦॥

Mãrutim ãshvine krushna-chaturdashyãm hi pujayet
Mãrge mandira-samprãptau tad-devam pranamed hradã (250)

[251] વિષ્ણુશ્ચ શંકરશ્ચૈવ પાર્વતી ચ ગજાનનઃ ।
દિનકરશ્ચ પંચૈતા માન્યાઃ પૂજ્યા હિ દેવતાઃ ॥૨૫૧॥

Vishnush-cha Shankarash-chaiva Pãrvati cha Gajãnanaha
Dina-karash-cha panchaitã mãnyãh pujyã hi devatãhã (251)

[252] પરિરક્ષેદ્ દૃઢાં નિષ્ઠામ્ અક્ષરપુરુષોત્તમે ।
તથાપિ નૈવ કર્તવ્યં દેવતાન્તરનિન્દનમ્ ॥૨૫૨॥

Pari-rakshed dradhãm nishthãm Akshara-Purushottame
Tathã'pi naiva kartavyam devatã'ntara-nindanam (252)

[253] ધર્મા વા સંપ્રદાયા વા યેન્યે તદનુયાયિનઃ ।
ન તે દ્વેષ્યા ન તે નિન્દ્યા આદર્તવ્યાશ્ચ સર્વદા ॥૨૫૩॥

Dharmã vã sampradãyã vã ye'nye tad-anuyãyinaha
Na te dveshyã na te nindyã ãdartavyãsh-cha sarvadã (253)

[254] મન્દિરાણિ ચ શાસ્ત્રાણિ સન્તસ્તથા કદાચન ।
ન નિન્દ્યાસ્તે હિ સત્કાર્યા યથાશક્તિ યથોચિતમ્ ॥૨૫૪॥

Mandirãni cha shãstrãni santas-tathã kadãchana
Na nindyãste hi satkãryã yathã-shakti yathochitam (254)

[255] સંયમનોપવાસાદિ યદ્યત્તપઃ સમાચરેત્ ।
પ્રસાદાય હરેસ્તત્તુ ભક્ત્યર્થમેવ કેવલમ્ ॥૨૫૫॥

Sanyam-anopavãsãdi yad-yat-tapah samãcharet
Prasãdãya Hares-tat tu bhaktyartham eva kevalam (255)

[256] એકાદશ્યા વ્રતં નિત્યં કર્તવ્યં પરમાદરાત્ ।
તદ્દિને નૈવ ભોક્તવ્યં નિષિદ્ધં વસ્તુ કર્હિચિત્ ॥૨૫૬॥

Ekãdashyã vratam nityam kartavyam param-ãdarãt ।
Tad-dine naiva bhoktavyam niṣhiddham vastu karhichit ॥256॥

[257] ઉપવાસે દિવાનિદ્રાં પ્રયત્નતઃ પરિત્યજેત્ ।
દિવસનિદ્રયા નશ્યેદ્ ઉપવાસાત્મકં તપઃ ॥૨૫૭॥

Upavãse divã-nidrãm prayatnatah pari-tyajet
Divasa-nidrayã nashyed upavãsãtmakam tapaha (257)

[258] સ્વામિનારાયણેનેહ સ્વયં યદ્ધિ પ્રસાદિતમ્ ।
ગુરુભિશ્ચાક્ષરબ્રહ્મ-સ્વરૂપૈર્યત્ પ્રસાદિતમ્ ॥૨૫૮॥

Swãminãrãyaneneha swayam yaddhi prasãditam
Gurubhish-chã'kshara-Brahma-swarupair yat prasãditam (258)

[259] તેષાં સ્થાનવિશેષાણાં યાત્રાં કર્તું ય ઇચ્છતિ ।
તદ્યાત્રાં સ જનઃ કુર્યાદ્ યથાશક્તિ યથારુચિ ॥૨૫૯॥

Teshãm sthãna-visheshãnãm yãtrãm kartum ya ichchhati
Tad yãtrãm sa janah kuryãd yathã-shakti yathã-ruchi (259)

[260] અયોધ્યાં મથુરાં કાશીં કેદારં બદરીં વ્રજેત્ ।
રામેશ્વરાદિ તીર્થં ચ યથાશક્તિ યથારુચિ ॥૨૬૦॥

Ayodhyãm Mathurãm Kãshim Kedãram Badarim vrajet
Rãmeshvarãdi tirtham cha yathã-shakti yathã-ruchi (260)

[261] મર્યાદા પાલનીયૈવ સર્વૈર્મન્દિરમાગતૈઃ ।
નાર્યો નૈવ નરૈઃ સ્પૃશ્યા નારીભિશ્ચ નરાસ્તથા ॥૨૬૧॥

Maryãdã pãlaniyaiva sarvair mandiram ãgataihi
Nãryo naiva naraih sprushyã nãribhish-cha narãs-tathã (261)

[262] નિયમમનુસૃત્યૈવ સત્સંગસ્ય તુ મન્દિરે ।
વસ્ત્રાણિ પરિધેયાનિ સ્ત્રીભિઃ પુમ્ભિશ્ચ સર્વદા ॥૨૬૨॥

Niyamam anusrutyaiva satsangasya tu mandire
Vastrãni pari-dheyãni stribhih pumbhish-cha sarvadã (262)

[263] ગચ્છેદ્ યદા દર્શનાર્થં ભક્તજનો હરેર્ગુરોઃ ।
રિક્તેન પાણિના નૈવ ગચ્છેત્ તદા કદાચન ॥૨૬૩॥

Gachchhed yadã darshanãrtham bhakta-jano Harer guroho
Riktena pãninã naiva gachchhet tadã kadãchana (263)

[264] આદિત્યચન્દ્રયોર્ગ્રાહ-કાલે સત્સંગિભિઃ સમૈઃ ।
પરિત્યજ્ય ક્રિયાઃ સર્વાઃ કર્તવ્યં ભજનં હરેઃ ॥૨૬૪॥

Ãditya-chandrayor grãha-kãle satsangibhih samaihi
Pari-tyajya kriyãhã sarvãh kartavyam bhajanam Harehe (264)

[265] નિદ્રાં ચ ભોજનં ત્યક્ત્વા તદૈકત્રોપવિશ્ય ચ ।
કર્તવ્યં ગ્રાહમુક્ત્યન્તં ભગવત્કીર્તનાદિકમ્ ॥૨૬૫॥

Nidrãm cha bhojanam tyaktvã tadaikatropavishya cha
Kartavyam grãha-muktyantam Bhagavat-kirtanãdikam (265)

[266] ગ્રાહમુક્તૌ સવસ્ત્રં હિ કાર્યં સ્નાનં સમૈર્જનૈઃ ।
ત્યાગિભિશ્ચ હરિઃ પૂજ્યો દેયં દાનં ગૃહસ્થિતૈઃ ॥૨૬૬॥

Grãha-muktau sa-vastram hi kãryam snãnam samair janaihi
Tyãgibhish-cha Harihi pujyo deyam dãnam gruhasthitaihi (266)

[267] જન્મનો મરણસ્યાપિ વિધયઃ સૂતકાદયઃ ।
સત્સંગરીતિમાશ્રિત્ય પાલ્યાઃ શ્રાદ્ધાદયસ્તથા ॥૨૬૭॥

Janmano maranasyã'pi vidhayah sutakãdayaha
Satsanga-ritim-ãshritya pãlyãh shrãddhã-dayas-tathã (267)

[268] પ્રાયશ્ચિત્તમનુષ્ઠેયં જાતે ત્વયોગ્યવર્તને ।
પરમાત્મપ્રસાદાર્થં શુદ્ધેન ભાવતસ્તદા ॥૨૬૮॥

Prãyash-chittam anushtheyam jãte tvayogya-vartane
Paramãtma-prasãdãrtham shuddhena bhãvatas-tadã (268)

[269] આપત્કાલે તુ સત્યેવ હ્યાપદો ધર્મમાચરેત્ ।
અલ્પાપત્તિં મહાપત્તિં મત્વા ધર્મં ન સંત્યજેત્ ॥૨૬૯॥

Ãpat-kãle tu satyeva hyãpado dharmam ãcharet
Alpãpattim mahãpattim matvã dharmam na san-tyajet (269)

[270] આપત્તૌ કષ્ટદાયાં તુ રક્ષા સ્વસ્ય પરસ્ય ચ ।
યથૈવ સ્યાત્ તથા કાર્યં રક્ષતા ભગવદ્‌બલમ્ ॥૨૭૦॥

Ãpattau kashta-dãyãm tu rakshã svasya parasya cha
Yathaiva syãt tathã kãryam rakshatã Bhagavad-balam (270)

[271] આપત્તૌ પ્રાણનાશિન્યાં પ્રાપ્તાયાં તુ વિવેકિના ।
ગુર્વાદેશાનુસારેણ પ્રાણાન્ રક્ષેત્ સુખં વસેત્ ॥૨૭૧॥

Ãpattau prãna-nãshinyãm prãptãyãm tu vivekinã
Gurvãdeshã'nusãrena prãnãn rakshet sukham vaset (271)

[272] સત્સંગરીતિમાશ્રિત્ય ગુર્વાદેશાનુસારતઃ ।
પરિશુદ્ધેન ભાવેન સર્વૈઃ સત્સંગિભિર્જનૈઃ ॥૨૭૨॥

Satsanga-ritim-ãshritya gurvãdeshã'nusãrataha
Pari-shuddhena bhãvena sarvaih satsangibhir janaihi (272)

[273] દેશં કાલમવસ્થાં ચ સ્વશક્તિમનુસૃત્ય ચ ।
આચારો વ્યવહારશ્ચ પ્રાયશ્ચિત્તં વિધીયતામ્ ॥૨૭૩॥

Desham kãlam avasthãm cha sva-shaktim anusrutya cha
Ãchãro vyavahãrash-cha prãyash-chittam vidhiyatãm (273)

[274] જીવનમ્ ઉન્નતિં યાતિ ધર્મનિયમપાલનાત્ ।
અન્યશ્ચાપિ સદાચારપાલને પ્રેરિતો ભવેત્ ॥૨૭૪॥

Jīvanam unnatim yãti dharma-niyama-pãlanãt
Anyashchã'pi sadãchãra-pãlane prerito bhavet (274)

[275] ભૂતપ્રેતપિશાચાદેર્ભયં કદાપિ નાપ્નુયાત્ ।
ઈદૃક્શંકાઃ પરિત્યજ્ય હરિભક્તઃ સુખં વસેત્ ॥૨૭૫॥

Bhuta-preta-pishãchãder bhayam kadãpi nã'pnuyãt
Idruk shankãh pari-tyajya haribhaktah sukham vaset (275)

[276] શુભાશુભપ્રસંગેષુ મહિમસહિતં જનઃ ।
પવિત્રાં સહજાનન્દ-નામાવલિં પઠેત્ તથા ॥૨૭૬॥

Shubhã'shubha-prasangeshu mahima-sahitam janaha
Pavitrãm Sahajãnanda-Nãmãvalim pathet tathã (276)

[277] કાલો વા કર્મ વા માયા પ્રભવેન્નૈવ કર્હિચિત્ ।
અનિષ્ટકરણે નૂનં સત્સંગાશ્રયશાલિનામ્ ॥૨૭૭॥

Kãlo vã karma vã mãyã prabhaven-naiva karhichit
Anishta-karane nunam satsangã'shraya-shãlinãm (277)

[278] અયોગ્યવિષયાશ્ચૈવમ્ અયોગ્યવ્યસનાનિ ચ ।
આશંકાઃ સંપરિત્યાજ્યાઃ સત્સંગમાશ્રિતૈઃ સદા ।।૨૭૮।।

Ayogya-vishayãsh-chaivam ayogya-vyasanãni cha
Ãshankãh sampari-tyãjyãh satsangam ãshritaih sadã (278)

[279] નૈવ મન્યેત કર્તૃત્વં કાલકર્માદિકસ્ય તુ ।
મન્યેત સર્વકર્તારમ્ અક્ષરપુરુષોત્તમમ્ ।।૨૭૯।।

Naiva manyeta kartrutvam kãla-karmãdikasya tu
Manyeta sarva-kartãram Akshara-Purushottamam (279)

[280] વિપત્તિષુ ધરેદ્ધૈર્યં પ્રાર્થનં યત્નમાચરેત્ ।
ભજેત દૃઢવિશ્વાસમ્ અક્ષરપુરુષોત્તમે ।।૨૮૦।।

Vipattishu dhared dhairyam prãrthanam yatnam ãcharet
Bhajeta dradha-vishvãsam Akshara-Purushottame (280)

[281] ત્યાગાશ્રમેચ્છુના દીક્ષા ગ્રાહ્યા બ્રહ્માક્ષરાદ્ ગુરોઃ।
બ્રહ્મચર્યં સદા સર્વૈઃ પાલ્યં ત્યાગિભિરષ્ટધા।।૨૮૧।।

Tyãgã'shramechchhunã dikshã grãhyã Brahmã'ksharãd guroho
Brahma-charyam sadã sarvaih pãlyam tyãgibhir ashtadhã (281)

[282] ધનં તુ ત્યાગિભિસ્ત્યાજ્યં રક્ષ્યં સ્વીયતયા ન ચ ।
સ્પૃશ્યં નૈવાપિ વિત્તં ચ ત્યાગિભિસ્તુ કદાચન ॥૨૮૨॥

Dhanam tu tyãgibhis-tyãjyam rakshyam sviyatayã na cha
Sprushyam naivã'pi vittam cha tyãgibhis-tu kadãchana (282)

[283] ત્યાગિભિઃ પ્રીતિવૃદ્ધ્યર્થમ્ અક્ષરપુરુષોત્તમે ।
નિષ્કામત્વં સદા ધાર્યં નિર્લોભત્વં સદૈવ ચ ॥૨૮૩॥

Tyãgibhih priti-vruddhyartham Akshara-Purushottame
Nishkãmatvam sadã dhãryam nirlobhatvam sadaiva cha (283)

[284] નિઃસ્વાદત્વં સદા ધાર્યં નિઃસ્નેહત્વં તથૈવ ચ ।
નિર્માનત્વં સદા ધાર્યમ્ અન્યે ચ ત્યાગિનો ગુણાઃ ॥૨૮૪॥

Nihsvãdatvam sadã dhãryam nihsnehatvam tathaiva cha
Nirmãnatvam sadã dhãryam anye cha tyãgino gunãhã (284)

[285] સ્વાત્મબ્રહ્મૈકતાં પ્રાપ્ય સ્વામિનારાયણો હરિઃ ।
સર્વદા ભજનીયો હિ ત્યાગિભિર્દિવ્યભાવતઃ ॥૨૮૫॥

Svã'tma-brahmaikatãm prãpya Swãminãrãyano Harihi
Sarvadã bhajaniyo hi tyãgibhir divyabhãvataha (285)

[286] ત્યાગો ન કેવલં ત્યાગસ્ત્યાગો ભક્તિમયસ્ત્વયમ્ ।
પરિત્યાગો હ્યયં પ્રાપ્તુમ્ અક્ષરપુરુષોત્તમમ્ ॥૨૮૬॥

Tyãgo na kevalam tyãgas-tyãgo bhakti-mayas-tvayam
Pari-tyãgo hyayam prãptum Akshara-Purushottamam (286)

[287] આજ્ઞોપાસનસિદ્ધાન્તાઃ સર્વજીવહિતાવહાઃ ।
દુઃખવિનાશકા એતે પરમસુખદાયકાઃ ॥૨૮૭॥

Ãgnopãsana-siddhãntãh sarva-jiva-hitãvahãhã
Dukha-vinãshakã ete parama-sukha-dãyakãhã (287)

[288] એતચ્છાસ્ત્રાનુસારેણ યઃ પ્રીત્યા શ્રદ્ધયા જનઃ ।
આજ્ઞોપાસનયોર્દાર્ઢ્યં પ્રકુર્યાત્ સ્વસ્ય જીવને ॥૨૮૮॥

Etachchhãstrãnusãrena yah prityã shraddhayã janaha
Ãgnopãsanayor dãrdhyam prakuryãt svasya jivane (288)

[289] હરેઃ પ્રસન્નતાં પ્રાપ્ય તત્કૃપાભાજનો ભવેત્ ।
જીવન્નેવ સ્થિતિં બ્રાહ્મીં શાસ્ત્રોક્તામાપ્નુયાત્ સ ચ ॥૨૮૯॥

Harehe prasannatãm prãpya tat-krupã-bhãjano bhavet
Jivan-neva sthitim brãhmin shãstroktãm ãpnuyãt sa cha (289)

[290] ધર્મૈકાન્તિકસંસિદ્ધિમ્ આપ્નુતે દિવ્યમક્ષરમ્ ।
શાશ્વતં ભગવદ્ધામ મુક્તિમાત્યન્તિકીં સુખમ્ ॥૨૯૦॥

Dharmaikãntika-sansiddhim ãpnute divyam Aksharam
Shãshvatam Bhagavad-dhãma muktim-ãtyantikim sukham (290)

[291] અક્ષરબ્રહ્મસાધર્મ્યં સંપ્રાપ્ય દાસભાવતઃ ।
પુરુષોત્તમભક્તિર્હિ મુક્તિરાત્યન્તિકી મતા ॥૨૯૧॥

Aksharabrahma-sãdharmyam samprãpya dãsa-bhãvataha
Purushottama-bhaktir hi muktir ãtyantiki matã (291)

[292] સંક્ષિપ્યાત્ર કૃતં હ્યેવમ્ આજ્ઞોપાસનવર્ણનમ્ ।
તદ્વિસ્તરં વિજાનીયાત્ સાંપ્રદાયિકશાસ્ત્રતઃ ॥૨૯૨॥

Sankshipyã'tra krutam hyevam ãgnopãsana-varnanam
Tad vistaram vijãniyãt sãmpradãyika-shãstrataha (292)

[293] એતત્સત્સંગદીક્ષેતિ શાસ્ત્રસ્ય પ્રતિવાસરમ્ ।
કાર્યઃ સત્સંગિભિઃ પાઠ એકાગ્રચેતસા જનૈઃ ॥૨૯૩॥

Etat-Satsanga-Diksheti shãstrasya prati-vãsaram
Kãryah satsangibhih pãtha ekãgra-chetasã janaihi (293)

[294] પઠને ચાસમર્થૈસ્તુ શ્રવ્યં તત્ પ્રીતિપૂર્વકમ્ ।
આચરિતું ચ કર્તવ્યઃ પ્રયત્નઃ શ્રદ્ધયા તથા ॥૨૯૪॥

Pathane chã'samarthais-tu shravyam tat priti-purvakam
Ãcharitum cha kartavyah prayatnah shraddhayã tathã (294)

[295] પરમાત્મા પરં બ્રહ્મ સ્વામિનારાયણો હરિઃ ।
સિદ્ધાન્તં સ્થાપયામાસ હ્યક્ષરપુરુષોત્તમમ્ ॥૨૯૫॥

Paramãtmã Param Brahma Swãminãrãyano Harihi
Siddhãntam sthãpayãmãsa hyakshara-Purushottamam (295)

[296] ગુરવશ્ચ ગુણાતીતાશ્ચક્રુસ્તસ્ય પ્રવર્તનમ્ ।
વિરચિતમિદં શાસ્ત્રં તત્સિદ્ધાન્તાનુસારતઃ ॥૨૯૬॥

Guravash-cha Gunãtitãsh-cha-krustasya pravartanam
Virachitam idam shãstram tat-siddhãntã'nusãrataha (296)

[297] કૃપયૈવાવતીર્ણોઽત્ર મુમુક્ષુમોક્ષહેતુના ।
પરબ્રહ્મ દયાલુર્હિ સ્વામિનારાયણો ભુવિ ॥૨૯૭॥

Krupayaivã'vatirno'tra mumukshu-moksha-hetunã
Parabrahma dayãlur hi Swãminãrãyano bhuvi (297)

[298] સકલાશ્રિતભક્તાનાં યોગક્ષેમૌ તથાવહત્ ।
વ્યધાત્ સ દ્વિવિધં શ્રેય આમુષ્મિકં તથૈહિકમ્ ॥૨૯૮॥

Sakalã'shrita-bhaktãnãm yoga-kshemau tathã'vahat
Vyadhãt sa dvi-vidham shreya ãmushmikam tathaihikam (298)

[299] સર્વત્રૈવાભિવર્ષન્તુ સદા દિવ્યાઃ કૃપાશિષઃ ।
પરમાત્મપરબ્રહ્મ-સ્વામિનારાયણપ્રભોઃ ॥ ૨૯૯॥

Sarvatraivã'bhivarshantu sadã divyãh krupã'shishaha
Paramãtma-Parabrahma-Swãminãrãyana-Prabhoho (299)

[300] સર્વેષાં સર્વદુઃખાનિ તાપત્રયમુપદ્રવાઃ ।
ક્લેશાસ્તથા વિનશ્યેયુરજ્ઞાનં સંશયા ભયમ્ ॥૩૦૦॥

Sarveshãm sarva-dukhãni tãpa-trayam upadravãhã
Kleshãs-tathã vinashyeyur agnãnam sanshayã bhayam (300)

[301] ભગવત્કૃપયા સર્વે સ્વાસ્થ્યં નિરામયં સુખમ્ ।
પ્રાપ્નુવન્તુ પરાં શાન્તિં કલ્યાણં પરમં તથા ॥૩૦૧॥

Bhagavat-krupayã sarve svãsthyam nirãmayam sukham
Prãpnuvantu parãm shãntim kalyãnam paramam tathã (301)

[302] ન કશ્ચિત્ કસ્યચિત્ કુર્યાદ્ દ્રોહં દ્વેષં તથા જનઃ ।
સેવન્તામાદરં સર્વે સર્વદૈવ પરસ્પરમ્ ॥૩૦૨॥

Na kashchit kasyachit kuryãd droham dvesham tathã janaha
Sevantãm ãdaram sarve sarvadaiva parasparam (302)

[303] સર્વેષાં જાયતાં પ્રીતિર્દૃઢા નિષ્ઠા ચ નિશ્ચયઃ ।
વિશ્વાસો વર્ધતાં નિત્યમ્ અક્ષરપુરુષોત્તમે ॥૩૦૩॥

Sarveshãm jãyatãm pritir dradhã nishthã cha nishchayaha
Vishvãso vardhatãm nityam Akshara-Purushottame (303)

[304] ભવન્તુ બલિનઃ સર્વે ભક્તાશ્ચ ધર્મપાલને ।
આપ્નુયુઃ સહજાનન્દ-પરાત્મનઃ પ્રસન્નતામ્ ॥૩૦૪॥

Bhavantu balinah sarve bhaktãsh-cha dharma-pãlane
Ãpnuyuh Sahajãnanda-Parãtmanah prasannatãm (304)

[305] પ્રશાન્તૈર્જાયતાં યુક્તો મનુષ્યૈર્ધર્મશાલિભિઃ ।
સંસારઃ સાધનાશીલૈરધ્યાત્મમાર્ગસંસ્થિતૈઃ ॥૩૦૫॥

Prashãntair jãyatãm yukto manushyair dharma-shãlibhihi
Sansãrah sãdhanã-shilair adhyãtma-mãrga-sansthitaihi (305)

[306] ઐક્યં મિથઃ સુહૃદ્ભાવો મૈત્રી કારુણ્યમેવ ચ ।
સહનશીલતા સ્નેહઃ સર્વજનેષુ વર્ધતામ્ ॥૩૦૬॥

Aikyam mithah suhrud-bhãvo maitri kãrunyam eva cha
Sahana-shilatã snehah sarva-janeshu vardhatãm (306)

[307] સત્સંગે દિવ્યસમ્બન્ધાદ્ બ્રહ્મણઃ પરબ્રહ્મણઃ ।
સર્વેષાં જાયતાં દાર્ઢ્યં નિર્દોષદિવ્યભાવયોઃ ॥૩૦૭॥

Satsange divya-sambandhãd Brahmanah Parabrahmanaha
Sarveshãm jãyatãm dãrdhyam nirdosha-divya-bhãvayoho (307)

[308] અક્ષરરૂપતાં સર્વે સંપ્રાપ્ય સ્વાત્મનિ જનાઃ ।
પ્રાપ્નુયુઃ સહજાનન્દે ભક્તિં હિ પુરુષોત્તમે ॥૩૦૮॥

Akshara-rupatãm sarve samprãpya svãtmani janãhã
Prãpnuyuh Sahajãnande bhaktim hi Purushottame (308)

[309] માઘસ્ય શુક્લપંચમ્યામ્ આરબ્ધમસ્ય લેખનમ્ ।
પવિત્રે વિક્રમાબ્દે હિ રસર્ષિખદ્વિસંમિતે ॥૩૦૯॥

Mãghasya shukla-panchamyãm ãrabdham asya lekhanam
Pavitre vikramãbde hi rasarshi-kha-dvi-sanmite (309)

[310] ચૈત્રશુક્લનવમ્યાં ચ સ્વામિનારાયણપ્રભોઃ ।
તચ્ચ સંપૂર્ણતાં પ્રાપ્તં દિવ્યજન્મમહોત્સવે ॥૩૧૦॥

Chaitra-shukla-navamyãm cha Swãminãrãyaṇa-Prabhoho
Tach-cha sampurnatãm prãptam divya-janma-mahotsave (310)

[311] ઉપાસ્યસહજાનન્દ-હરયે પરબ્રહ્મણે ।
મૂલાક્ષરગુણાતીતાનન્દાય સ્વામિને તથા ॥૩૧૧॥

Upãsya-Sahajãnanda-Haraye Parabrahmane
Mulã'kshara-Gunãtītãnandãya Swãmine tathã (311)

[312] ભગતજીમહારાજ- સાક્ષાદ્વિજ્ઞાનમૂર્તયે ।
યજ્ઞપુરુષદાસાય સત્યસિદ્ધાન્તરક્ષિણે ॥૩૧૨॥

Bhagataji-Mahãrãja-sãkshãd-vignãna-murtaye
Yagnapurushadãsãya satya-siddhãnta-rakshine (312)

[313] વાત્સલ્યાર્દ્રાત્મને નિત્યમ્ આનન્દબ્રહ્મયોગિને ।
વિશ્વવન્દ્યવિનમ્રાય ગુરવે પ્રમુખાય ચ ॥૩૧૩॥

Vãtsalyã'rdrã'tmane nityam ãnanda-brahma-yogine
Vishva-vandya-vinamrãya gurave Pramukhãya cha (313)

[314] અંજલિઃ શાસ્ત્રરૂપોયં સાનન્દં ભક્તિભાવતઃ ।
અર્પ્યતે પ્રમુખસ્વામિ-જન્મશતાબ્દિપર્વણિ ॥૩૧૪॥

Anjalih shãstra-rupo'yam sãnandam bhakti-bhãvataha
Arpyate Pramukha-Swãmi-janma-shatãbdi-parvani (314)

[315] તનોતુ સકલે વિશ્વે પરમાનન્દમંગલમ્ ।
સ્વામિનારાયણઃ સાક્ષાદ્ અક્ષરપુરુષોત્તમઃ ॥૩૧૫॥

Tanotu sakale vishve paramãnanda-mangalam
Swãminãrãyanah sãkshãd Akshara-Purushottamaha (315)

# NOTES



સત્સંગદીક્ષાના સંસ્કૃત શ્લોકોનો મુખપાઠ કરનારને અક્ષરપુરુષોત્તમ દર્શનનો વિદ્વાન જાણવો.

॥ सत्संगदीक्षा मुखपाठ स्पर्धा ॥

आफ्रिका

Bhramswarup
Pramukh Swami Maharaj

BAPS

Guruhari
Mahant Swami Maharaj